अन्ततो वेदापौरुषेयत्वमतं वेदान्तःसाक्ष्यसिद्धं शास्त्रप्रमाणपरीक्षितं व्यवहारनिकषनिरीक्षितं चेति दिक्।

संकेत सन्दर्भ

१. ऋक् १०/९०/९ तथा यजु० ३१/७।
२. अथर्व १०/७/२०।
३. अथर्व १३/४/३८।
४. ऋक् १०/१७/१।
५. ऋक् १०/७१/३।
६. यजु २६/२।
७. ऋक् ८/७५/६।
८. तै० ब्रा० २/८/५।
९. श्वे० उ० ६/८।
१०. बृ० उ० २/४/१०।
११. सायणभाष्यमंगलाचरणम्।
१२. म० भा० १२/२३/२४।
१३. भगवद्गीता ३/१५।
१४. तै० आ० ४/१७ सायणभाष्यम्।
१५. ऐ० ब्रा० ६/१/१
१६. "ऋषिर्दर्शनात्। स्तोमान्ददर्शेत्यौ पमन्यवस्तद् यदेनांस्तपस्यमानान् ब्रह्म स्वयमभ्यानर्षत्, ऋषयोऽभवं-स्तदृषीणां ऋषित्वमिति विज्ञायते"—निरुक्त–२/३/२।
१७. न्यायसूत्रम् २/१/६८।
१८. मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेद इति वेदानां नित्यत्वं आप्तप्रामा-ण्याच्च प्रामाण्यम्॥ उपर्युक्तन्यायसूत्रे वात्स्यायनभाष्यम्।
१९. वैशेषिक सूत्रम् १/१/३।
२०. उदयनाचार्यः—किरणावलिः (वै० सू० १/१/३ व्याख्या)।
२१. सांख्यसूत्रम् ५/४६।
२२. सांख्यसूत्रम् ५/४७।
२३. सांख्यसूत्रम् ५/५१

२४. श्रुतिः—वाक्यजनितं वाक्यार्थज्ञानम् । तच्च स्वतः प्रमाणम् । अौरुषेयवेदवाक्यजनितत्वेन सकल-दोषाशंकाविनिर्भुक्तेर्युक्तं भवति । सां० तत्त्व० कौ० ५ भी कारिका ।

२५. योगसूत्रम् १.२६ ।

२६. ब्रह्मसूत्रम् १/१/२ ।

२७. उपर्युक्त सूत्रें शांकरभाष्यम् ।

२८. ब्रह्मसूत्रम् १/३/२९ ।

२९. उपर्युक्तसूत्रे शांकरभाष्यम् ।

३०. ब्रह्मसूत्रम् १/३/३०

३१. वेदान्तपरिभाषा (आगमपरिच्छेदस्यान्तिमो भागः) ।

३२. मीमांसासूत्रम् १/१/१४, १७, १८, १९ ।

३३. मीमांसासूत्रम् १/५ (शाबरभाष्यम्) ।

३४. मीमांसासूत्रम् १/१/३० ।

३५. तै० सं ७/२/२/१ ।

३६. मीमांसासूत्रम् १/१/३१ ।

३७. यजु० २६/२ ।

अध्यक्ष, संस्कृत विभाग
एन. ए. एस. कालिज, मेरठ ।

□ धर्मदेवो वेदवाचस्पतिः

यास्क कालिका विविधा वेदार्थपद्धतयः

वेदोऽखिलो धर्ममूलमिति नातिरञ्जितं वचो भगवतो मनोः। वेदा हि भारतीयसभ्यतायाः संस्कृतेः धर्मस्य ज्ञानविज्ञानस्य च मूलभूतं स्रोतः। प्राचीनतमत्वात् ज्ञानविज्ञानानां गहनत्वाच्च भारतीया ऋषयो मुनयश्च एतेषामवगाहनाय सुरक्षणाय च विविधानुपायाँश्चक्रुः, वेदाङ्गनाम्ना विख्यातान् विविधान् ग्रन्थाँश्च निर्ममिरे। तेषु प्रधानतममंगं निरुक्तशास्त्रं वर्तते। तत्रादौ निरुक्तशास्त्रस्य यानि प्रयोजनान्युक्तानि तेनाप्यस्य वेदाङ्गस्य महत्त्वं विशदी भवति। तानि प्रयोजनानि प्राधान्येन त्रीणि सन्ति—

(१) मन्त्रेष्वर्थप्रत्ययः, (२) पदविभागः, (३) मन्त्राणां दैवतज्ञानं च ॥

(निरुक्त, अ० १, पाद ५–६)

श्री यास्काचार्यविरचित-निरुक्तशास्त्राध्ययनेन प्रतीयते यत्ततोऽपि प्राक्तनात् कालात् निरुक्तविद्या विविधा वेदार्थपद्धतयश्च प्रचलिता आसन्। श्रीयास्कमुनिना स्वग्रन्थे चतुर्दशनिरुक्ताचार्याणां नामानि निर्दिष्टानि, स्थाने स्थाने च निर्वचनप्रसङ्गे ब्राह्मणवचनान्युद्धृतानि, तथैव मन्त्रार्थप्रसङ्गे विविधानां सम्प्रदायानामुल्लेख आलोचनं वा कृतमिति। ते च प्राधान्येन पञ्च सन्ति—याज्ञिकाः, आख्यानविदः, ऐतिहासिकाः, अध्यात्मवादिनः, नैरुक्ताश्च। तद्व्यतिरिक्तं कुत्रचित् नैदानमतं वैयाकरणमतमपि प्रदर्शितम्। परं न तयो र्मन्त्रार्थविषये सविशेषं स्थानम्। पूर्वोक्ता पञ्च सम्प्रदायाः प्राचीनात् कालादद्यावध्यपि अस्माकं देशे प्रचलिताः सन्ति।

किं नाम स्वरूपमेतेषां सम्प्रदायानां, कस्मिन् विषये चैतेषां संवादो विसंवादो वा यास्कमुनेरित्येव विचारणीयोऽस्माकम्।

(१) **याज्ञिकसम्प्रदायः**—एष सम्प्रदायो विविधेषु प्रसङ्गेषु निर्दिष्टो दृश्यते। दर्शपौर्णमासादि यज्ञेषु विनियोगार्यैव मन्त्राः सृष्टा इति सिद्धान्तमाश्रित्यैव मन्त्राणामर्थं देवतानां वा स्वरूपं स्थिरी कुर्वन्ति एते याज्ञिकाः।

'ऋचां त्वा पोषमास्ते पुपुष्वान्' इत्यादिषु मन्त्रेषु अधियज्ञमर्थं स्वीकुर्वाणोऽपि यास्काचार्यो विनियोगार्थं मन्त्राः सृष्टा इति सिद्धान्तं नांगीकरोति। अत एव यज्ञविधिमनुसृत्य देवतार्थनिर्णयपद्धतिं नानुमोदते।

(२) **आख्यानसम्प्रदायः**—मन्त्रार्थव्याख्याप्रसङ्गे पञ्चषः वारं अस्य सम्प्रदायस्योल्लेखो विहितो यास्काचार्येण। मन्ये ऋक्षु स्थाने स्थाने आख्यान शैलीं विलोक्य अस्य सम्प्रदायस्य प्रादुर्भावो बभूव। यथाह किल—**'यो जात एव प्रथमो बभूव'**—(ऋक् २/१२/१), **'एकः सुपर्णः स समुद्रमाविवेश'**—(ऋक् १०/११४/४) इत्येतयोः मन्त्रयो=व्याख्या प्रसङ्गे यास्को मुनिराह—"**ऋषेः दृष्टार्थस्य प्रीतिर्भवत्याख्यान संयुक्ताः।**" वस्तुतः नैषा वास्तविकी कथा, परं वस्तुवर्णनस्य शैलीविशेष एव। बहवो महात्मानः, बौद्धानां जातकादयो ग्रन्थाः, बाइबलप्रभृतयश्चेमां शैलीमाद्रियमाणा दृश्यन्ते। परं कालक्रमेण आख्यानवादिन एतान्याख्यानि घटनापराणि स्वीकर्तुं प्रवृत्ताः।

एष आख्यानवादश्च कालक्रमेण ऐतिहासिकसम्प्रदायं जन्म प्रादात् । ब्राह्मणग्रन्थानामर्थवादशैली उभयो मंध्यवर्तिनी शृंखला वर्तते । तत्र इन्द्रवृत्रादीनां अधिदैवतमर्थं कुर्वताऽपि ब्राह्मणकारेण वृत्रशब्दस्य निर्वचनसमये भूतकालवाचिनी क्रिया प्रयुक्ता । तद्यथा—"**यदवृणोत् तद् वृत्रस्य वृत्रत्वम्, यदवर्तत तद्वृत्रस्य वृत्रत्वम्, यदवर्धत तद् वृत्रस्य वृत्रत्वम् ।।**"

इमं भूतकालक्रियायाः प्रयोगं समीक्ष्य ऐतिहासिकाः खलु इमां भूतकालिकां वास्तविकीं घटनाममन्यन्त । 'इति ह–निश्चयेन-आस–बभूव'—इत्येवं मन्यमाना विद्वांसः 'ऐतिहासिका' इति संज्ञामलभन्त । नैरुक्तास्तु एतान्याख्यानानि वस्तु प्रतिपादनस्य शैली विशेष एव मन्यते, न पुनः परमार्थेन घटिता घटनाविशेषाः ।

(३) **ऐतिहासिकसम्प्रदायः**—श्रीमता यास्काचार्येण सर्वतो बहुलमस्यैव सम्प्रदायस्योल्लेखा व्यधायि । मन्ये तस्मिन् युगेऽस्यैव बहुतरः प्रचार आसीत् । निरुक्ते त्रिविधोऽस्योल्लेखः । (क) स्थानत्रये—'**इति नैरुक्ताः, इत्यैतिहासिकाः**' इत्युक्त्वा उभयोः सम्प्रदाययो र्मतमुद्धृतम् । (ख) पञ्चसु स्थलेषु—'**तत्रेतिहासमाचक्षते**' इत्युक्त्वा ऐतिहासिकं मतं संक्षिप्योक्तम् । (ग) कुत्रचिच्च '**ऐतिहासिकाः**' '**इतिहासः**'—इत्येतयोः शब्दयोः प्रयोगमविधाय काचित् कथा वर्णिता । अन्ते च 'तदभिवादिन्येषा ऋग्भवति'–इत्येवमैतिहासिकं मतं प्रदर्शितम् ।

प्रथमे प्रकारे तदितरयोः प्रकारयोश्च भेदद्वयमुपलक्ष्यते । (१) यत्र 'ऐतिहासिकाः' इत्युक्तं तत्र तद्विरोधी नैरुक्तपक्षोऽपि निर्दिष्टः । अथ च एतादृशेषु प्रसङ्गेषु प्रायेण देवतानामर्थविशेष एव विचार्यते । यत्र पुनः 'इतिहासमाचक्षते' इत्युक्तं, केवलं कथा वा वर्ण्यते, तत्र निरुक्तपक्षः पृथक् न प्रदर्श्यते, न च कस्याश्चिद् देवताया विचारः । परं कश्चिद् ऋषिः राजा वा प्रस्तूयते ।

एतेन एतत्तु निश्चप्रचं वक्तुं शक्यते यत् वृत्र–सरण्यू–सरमा–प्रभृतीनां देवासुराणां इतिहासपरा व्याख्या नानुमोदिता श्रीमतो यास्काचार्यस्य । स किल तेषामधिदैवतमर्थमंगीकुरुते । तेषां देवानां संग्रामं जनकपुत्रादिसम्बन्धं वा औपचारिकम् आलङ्कारिकं वा मन्यते । परं तदतिरिक्ते प्रसङ्गद्वये नैरुक्तानामभिमतस्यार्थस्य निर्देशाभावादस्ति किल सन्देहावकाशो विदुषां यद् यास्काचार्यो वेदे ऋषीणां राज्ञां वैतिहासिकं वर्णनमूरीकरोति न वेति । अस्मिन् प्रसङ्गे वयं पश्यामः, यदा स मुनिः—'**पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे** ।' (नि० १/२), '**तद्यदेनान् तपस्यमानान् ब्रह्म स्वयम्भू अभ्यानर्षत् ते ऋषयोऽभवन्, तदृषीणामृषित्वम्** ।' (नि० २/११), '**एवमुच्चावचैरभिप्रायैः ऋषीणां मन्त्रदृष्टयो भवन्ति** ।' (नि० ७/३)—इत्येवं प्रभृतिषु स्थलेषु वेदानां नित्यत्त्वं ऋषीणां च मन्त्रद्रष्टृत्वमभ्युपगच्छन्नवलोक्यते, तदा यास्कमते देवापि शन्तनु-प्रियमेध-सुदास-विश्वामित्र-त्रितप्रभृतय ऐतिहासिकाः पुरुषाः सन्ति इति न विश्वसिति नश्चेतः । अथ च इदमपि चिन्तनीयं भवति यदन्यथा कुतः खलु यास्काचार्य एषां व्यक्तिविशेषबोधकानां नाम्नां निर्वचनं विधत्ते । यतो हि स खलु जातिवाचकानां संज्ञापदानां (Common Noun) एव सर्वत्र निर्वचनमकरोत्, न पुनः व्यक्तिवाचकानां शाकपूणिस्थौलष्ठीविप्रभृतीनां व्यक्तिवाचकानां पदानाम् । तस्मादिदमनुमातुं शक्यते यन्निरुच्यमानत्वादेतानि नामानि न व्यक्तिविशेषवाचकानि, परं तदन्तर्निहितं गुणं क्रियां वा प्रकाशयितुः यस्य कस्यापि राज्ञो वा ऋषे र्वा बोधकानि सन्ति । मन्ये नेदं यास्कमुनेरभिमतं यत् पुरा कदाचिद् देवापिः शन्तनुः मुद्गलो वा नाम कश्चिद्राजविशेषोऽजायत, प्रत्युत निर्वचननिर्दिष्टैः गुणैरलंकृताः समये समयेऽस्मिन् संसारे जायमाना राजान एव वर्ण्यन्ते । अतएव निरुक्तसमुच्चयग्रन्थप्रणेता वररुचिः स्कन्दस्वामी

चाहुः—"**औपचारिकोऽयं मन्त्रेष्वाख्यानसमयः नित्यत्व विरोधात्, परमार्थेन तु नित्यपक्ष एवेति नैरुक्तानां सिद्धान्तः।**"—इत्युक्त्वा स्कन्दस्वामी किल ऋषिषेण-देवापि-शन्तनु-प्रियमेध-भृग्वंगिरिस्त्रित-प्रभृतीनि पदानि नित्यपक्षे यजमानवाचकानि नित्यपदार्थवाचकानि च व्याख्यातवान् (पृष्ठम् ७७, ७८, १८०, २१०)। एतदेव क्वचिद् दुर्गाचार्योऽप्यंगीकरोति। '**विश्वकर्मा विमनाः**……' इति मन्त्रे '**तत्रेतिहासमाचक्षते**'—इत्युक्त्वा श्री यास्कः यदा स्वग्रन्थे कमपीतिहासं दर्शितवान्। तस्याभिप्रायं विद्वद्वरेण्यो भाष्यकारो दुर्गाचार्य इत्थं व्याचष्टे—

'तत्रैतस्मिन्नर्थे इतिहासमाचक्षते आत्मविद् इतिवृत्त परकृत्यर्थवादरूपेण। यः कश्चिदाध्यात्मिक आधिदैविक आधिभौतिको वाऽर्थ आख्यायते दिष्ट्युदितावभासनार्थं स इतिहास इत्युच्यते। स पुनरयमितिहासः सर्वप्रकारो नित्यमविवक्षितस्वार्थः तदर्थप्रतिपत्तॄणामुपदेशपरत्वात्।'

इदमपि सम्भोभवीति यद् यास्केन मुनिनैतेषु स्थलेषु इतिहासशब्दप्रयोग इतिवृत्तपरमकृत्वा अर्थान्तर एव कृतो भवेत्। इतिहासशब्दः इतिवृत्तसूचकः सन्नपि प्राचीनसंस्कृतसाहित्येऽनेकेष्वर्थेषु प्रयुज्यते स्म। श्रीमान् मोनियरविलियम्स महोदयः Sanskrit English Dictionary नामग्रन्थे इतिहासपदस्य अधोलिखितानर्थान् दर्शयति—

Talk, legend, tradition, history, traditional, account of formed events, heroic history.

यथा महाभारतेऽनेकत्र 'तत्रोदाहरन्ति हेममितिहासं पुरातनम् इत्युक्त्वा पशुपक्षिणां कथा वर्णिता। अत्र किलेतिहासशब्दः काल्पनिककथामात्रपरो न तु इतिवृत्तसूचकः।

समासत इदमेवास्माभिः वक्तुमिष्यते यत् पुरस्तात् प्रोक्तेषु द्वितीयतृतीयविधेषु प्रसंगेषु ऐतिहासिकमर्थमखण्डयन्नपि यास्काचार्यः तन्निर्वचनव्याजेन तेषां पदानां जातिवाचकत्वं दर्शयति, यद्वा पुरुषविशेषस्येतिहासमनुक्त्वा नित्येतिहासं सूचयति।

इदमपि नाप्रासंगिकं भवेद् यदैतिहासिकसम्प्रदायवादिनो यथा वेदेषु राज्ञामृषीणाञ्चेतिहासं जानन्ति तथैवते इन्द्रादीनां देवतानामपीतिहासं स्वीकुर्वन्ति। इन्द्रदेवस्य सोमपानं, स्वगृहे निवासः, वृत्रेण सह संग्रामः इत्यादीनि पुरुषविधवर्णनानि तदितिहाससूचकान्येव। तथैव इन्द्रादीनां पितृ-पुत्र-भगिनी-जारादयः सम्बन्धा अपि सन्ति। पुरुषविधा एवैते देवाः। इत्थमयमैतिहासिकसम्प्रदायः ग्रीक-रोमन देवानामिव वैदिकदेवानामितिहासपरां व्याख्यां (Mythological or historical interpretation) करोति।

(४) **अध्यात्मवादिसम्प्रदायः**—अस्य सम्प्रदायस्योल्लेखः सर्वतः प्रथमं '**य ईञ्चकार न सो अस्य वेद**' इति मन्त्रव्याख्यायां परिप्राज्ञकेति नाम्ना विहितः। तथैव '**चत्वारि वाक् परिमिता पदानि**……' इति मन्त्रव्याख्यावसरे विविधसम्प्रदायेषु अस्य सम्प्रदायस्यापि नामोल्लेखो वर्तते। स्वयं यास्काचार्योऽपि केषाञ्चिन्मन्त्राणामाधिदैवतमर्थं विधायाध्यात्मपरमर्थमपि प्रस्तुतवान्। (तद्यथा—**यत्र सुपर्णाः**०। नि० ३/१२, **सप्त ऋषयः**। नि० १२/३७, **विश्वकर्मा**०। नि० १०/२६, **तिर्यग्बिलः**। नि० १२/३८)। निरुक्तस्य चतुर्दशाध्याये तु प्रायेण सर्वे मन्त्रा अध्यात्मपरा एव। यदि नामायमध्यायो यास्ककृतो नापि स्वीक्रियेत तथाप्येभिः प्रसंगैः नातितिरोहितं यद् यास्काचार्यो मन्त्राणां न केवलमाधिदैवतमेवार्थं स्वीकुरुते, परमध्यात्मपरमपि। अत्रेदमप्यवधेयं यद् अध्यात्मशब्देनात्र ब्रह्मपरोऽर्थो नाभिप्रेतः, परं केन-तैत्तरीय-बृहदारण्यकादिष्विवात्रापि अध्यात्मशब्देन शरीरमुच्यते।

(५) **नैरुक्तसम्प्रदायः**—श्रीयास्काचार्योऽस्य सम्प्रदायस्य प्रमुखः प्रवक्ता वर्तते, न तु प्रवर्तकः। अतिचिरन्तनोऽयं सम्प्रदाय.। यास्केन मुनिना स्वग्रन्थे स्वयं चतुर्दशानांमाचार्याणां नामग्राहपूर्वकं स्थाने-स्थाने मतमुद्धृतम्। बहुत्र च 'इति नैरुक्ताः' इत्युक्त्वाऽस्य सम्प्रदायान्तरेभ्यो मतभेदो दर्शितः। द्विविधं खलु वैशिष्ठ्यमस्य सम्प्रदायस्य। प्रथमं तावत् सर्वाणि नामान्याख्यातजानि इति सिद्धान्तः। अतएव निर्वचनप्रकारमुल्लिख्योपसंजहम्—"अविद्यमाने सामान्येऽक्षरवर्णसामान्यान्निर्ब्रूयात्। न त्वेव न निर्ब्रूयात्। न संस्कारमाद्रियेत।।" द्वितीयं च वैशिष्ठ्यं देवतावादविषयकं, वैदिकदेवतानामाधिदैवतपरं व्याख्यानम् (Naturatistic interpretion)। एतदुभयं सम्प्रदायान्तरेभ्यो नैरुक्तसम्प्रदायस्य वैशिष्ठ्यं बोधयति। कतिचिद्भिरुदाहरणैः तत् स्फुटीभवति।

याज्ञिका ऐतिहासिकाश्च तावत् प्रायेण लौकिकशब्दानिव वैदिकानपि शब्दान् रूढीन् योगरूढीन् वा मन्यन्ते, न पुनः सर्वथा यौगिकान्। तेषां पदानाञ्च वाच्यार्थमेव गृह्णन्ति प्रायेण। अतएव इन्द्रादीनां देवानां पुरुषविधं वर्णनं युद्धादींश्च विलोक्य ग्रीकरोमपौराणिकदेवानिव वैदिकदेवानपि लोकोत्तरशक्तिमतः मनुष्यानिव शुभाशुभकर्मकर्तॄंश्च मन्यन्ते। नैरुक्तास्तावत् अन्यथैव विचारयन्ति। नैरुक्तसमये तु—"**स न मन्येतागन्तूनिवार्थान् देवतानाम्**" तन्मते त्रयो वावलोकाः, तिस्र एव च तेषां देवताः प्रधानाः। '**अग्निः पृथिवीस्थानः, वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः, आदित्यो वा द्युस्थानः: तासां महाभाग्याद् एकैकस्या अपि बहूनि नामधेयानि भवन्ति, अपि वा कर्मपृथक्त्वात्। यथा होताऽध्वर्युर्ब्रह्मोद्गाता इत्येकस्य सतः।**
(नि० ७/५।।)

इत्थमेताः सर्वा देवता प्राकृतिकाः सूर्यादयः भौतिका पदार्था एव, न पुनः काश्चिदद्भुताकृतयो अलौकिकाः सत्त्वविशेषाः। केषुचिन्मन्त्रेषु निर्वचनबलेन लक्ष्यार्थं वाऽऽश्रित्यासां देवतानां अध्यात्मपरोऽर्थोऽपि विहितः। नैरुक्तसम्मतस्य देवताव्याख्यानस्यांगीकारेण अनेकेषां मन्त्राणांमुपहासास्पदत्वं, देवानाञ्चाश्लीलतादोषः समाधीयते। तथा चैतान्याख्यानानि औपम्यमेव दर्शयन्ति, न तु वास्तविकं युद्धादिकम्। इन्द्र-वृत्रासुरयुद्धवर्णनमित्थं विशदीकृतं यास्काचार्येण—

"**तत् को वृत्रः? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। अपाञ्च ज्योतिषश्च मिश्रीभाव-कर्मणो वर्षकर्म जायत, तत्रोपमार्थेन युद्धवर्णा भवन्ति।** (नि० २/१६।।) तथैव स '**स्वसुजरिः शृणोतु नः**' (ऋक् ६/५५/५।) इति मन्त्रे स आदित्य एव स्वसुः–स्वभगिन्याः उषसः जारो जरयिता उक्तः। अपरञ्च—'**पिता दुहितुर्गर्भमाधात्**। (ऋक् १/१६४/३३।) इति मन्त्रेऽपि पितृ-दुहितृशब्दौ न रूढ़ी, परं यौगिकौ। 'पितापातापालयिता वा भवति। (नि० ४/१।।') दुहिता दूरे हिता दोग्धे र्वा। (नि० ३/४।।) पालपितृत्वात् पर्जन्योऽत्र पिता प्रोक्तः, दूरस्थितत्वाच्च भूमिः दुहिता। नैरुक्तमते नात्र पुरुषविधस्य देवविशेषस्य स्वकन्यायां गर्भधारणमुक्तम्, प्रत्युत पर्जन्यस्य पृथिव्यां वृष्टिजलसेचनमेव वर्णितम्। यद्वा पर्जन्ये पितृत्वस्य भूम्याञ्च दुहितृत्वस्य व्यपदेश उपचारादेव मन्तव्यः, काव्ये तथात्वात्।

अपरञ्च यास्काचार्योऽधोलिखितामृचमपि नैरुक्तदिशा व्याख्यातवान्—

"अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते।
उताश्विनावभरद् यत्तदासीदजहादुद्वामिथुना सरण्यूः।। (ऋक् १०/१/८७)

तत्रेतिहासमाचक्षते। त्वाष्ट्री सरण्यूः आदित्याद् यमौ मिथुनौ जनयाञ्चकार। सा सवर्णामन्यां प्रतिनिधायाश्वरूपं कृत्वा प्रदुद्राव। स विवस्वानादित्य आश्वमेव रूपं विधाय तामनुसृत्य संबभूव। ततो अश्विनौ जज्ञाते। सवर्णायां मनुः।

सैषा कथा सामाजिकं जीवनं क्षुद्रतरं दर्शयति, बालानां वा मनोविनोदायालम्। यास्कस्तु नात्रेति-हासं मन्यते। तन्मते प्रकृतौ नित्यं विलोक्यमाना घटनैवात्र वर्णिता। अस्तंगमिष्यन् सायंकालिकः सूर्य एव

त्वष्ट्रा। तस्मिन् काले पृथिव्यां तस्य प्रभाऽपि लुप्यते। ततो जायमाना छाया रात्रि र्वाऽत्र त्वाष्ट्री सरण्यूरुक्ता।

उत्तदासं कौलितरं बृहतः पर्वतादधि।
अवाहन्निन्द्र शम्बरम्॥ (ऋक् ४/३०/१४)

इत्यादिषु मन्त्रेषु शम्बरवृत्रादयो नासुरविशेषाः यानिन्द्रो जघान, परं मेघ एव तैः शब्दै रुच्यते, इन्द्रश्चात्र विद्युद्वाचकः। तयो मिश्रीभावकर्मणो यद् वर्षकर्म भवति तदेव युद्धरूपेण वर्ण्यते। तस्मादिदं युद्धवर्णनमालङ्कारिकमेव न तु वास्तविकम्। तथैवैतेषां देवानां हस्तपादादीनामुल्लेखोऽप्यौपचारिक एव, न तु वास्तविकः। एतादृशं पुरुषवर्णनं तु पाषाणादीनां जड़पदार्थानामपि श्रूयते। तद्यथा—"अभिक्रन्दन्ति हरितेभिरासभिः" तथा "होतुश्चित् पूर्वे हविरद्यमाशत" इति ग्रावस्तुतौ, "सुखं रथं युयुजे सिन्धुरश्विनम्" इति च नदीस्तुतौ।

एवमेव मन्त्रेषु देवतानां ये स्वसृदुहितृपितृजारादयः सम्बन्धा वर्णिता तेऽपि न रूढ़िवाचकाः, प्रत्युत यौगिके लाक्षणिके वाऽर्थे प्रयुक्ताः। पितृशब्दो न केवलं देहोत्पादयितुः जनकस्य नाम, परं यः कश्चित् पालनकर्ता, स पिता उच्यते। जारशब्दो न केवलमुपपतिवाचकः, परं कस्यापि जरयितु र्भवति। दुहितृ-शब्दो न कन्यावाचक एव, परं 'दूरेहिता' इत्यर्थसामान्यं द्योतयति। नापि स्वसृशब्दः केवलं भगिनीवरः परं वेदे 'स्वंसरः'—सूर्यो भवति 'स्वसृ' च उषाः।

इत्येवमेषां यौगिकमर्थं विधाय—'उदीरय पितरा जार आभगम्।' इत्येवमादिषु ऐतिहासिकै र्योऽश्लीलोऽर्थो वर्ण्यते, तन्नैरुक्तपद्धत्या निराक्रियते। यतोहि—'आदित्योऽत्र जार उच्यते, रात्रे र्जरयिता, स एव भासाम्॥" तस्याः कालः सूर्यास्तमयादारभ्य उषस उदयात् प्राग् वर्तते। अयं च मध्यवर्ती कालः अश्विनाविति संज्ञां लभते। इमौ अश्विनावेव सरण्यूपुत्रौ वर्तेते।

एवं निरुक्तसम्प्रदाये उर्वशी पुरूरवा वा नैतिहासिकौ स्त्रीपुरुषौ, परं विद्युन्मेघावेव।

समासत इदमुच्यते यन्निरुक्तसम्प्रदायः प्राधान्येन वेदमन्त्राणां तद्देवतानां च आधिदैवतव्याख्यां विधत्ते, याज्ञिकसम्प्रदायश्चाधियज्ञमाधिभौतिकं वाऽर्थं करोति, अध्यात्मवादिनश्च तेषामाध्यात्मिकीं व्याख्यां विदधति। श्रीयास्काचार्यश्च तेषां मन्त्राणां प्राधान्येनाधिदैवतव्याख्यां विदधन्नपि इतरं व्याख्याद्वयं न तिरस्करोति। अपि तु स्वयमपि कुत्रचित्तथैव व्याख्यां कुरुते। परं तृतीये ऐतिहासिके सम्प्रदाये नास्ति तस्य काश्चिदादरः। तन्मते ऋक्षु वर्णितस्यालङ्कारिकवर्णनस्य यौगिकस्यार्थस्य चाज्ञानादेव ऐतिहासिक-सम्प्रदायस्य जन्माभूत्॥

———

भूतपूर्व—वेदोपाध्याय
गुरुकुल काङ्गड़ी विश्वविद्यालय
हरिद्वार,

☐ डा० राकेश शास्त्री

वैदिक निपातों का महत्त्व

निरुक्तकार आचार्य यास्क ने पदों का चार श्रेणियों में विभाजन किया है—नाम, आख्यात, उपसर्ग और निपात।[१] यद्यपि कुछ विद्वानों ने 'कर्मप्रवचनीय' को पञ्चम पद-वर्ग की संज्ञा दी है,[२] तथापि सर्वमान्य न होने से वह वर्ग असंदिग्ध नहीं है। वस्तुतः निपात का भाषा में महत्वपूर्ण स्थान है। प्रायः सभी आचार्यों ने पदों की गणना करते समय निपातों की गणना चतुर्थ वर्ग में की है,[३] किन्तु इससे निपातों के महत्त्व में किसी प्रकार की कमी नहीं आती है। कुछ भाषा वैज्ञानिकों के विचार में तो भाषा की उत्पत्ति एवं विकास का अधार ही निपात रहे हैं उनके अनुसार—'अति प्राचीन काल में जब मानव के पास परिष्कृत वाणी का अभाव रहा होगा, तो वह मूल धातुओं एवं निपात जैसे सूक्ष्म पदों के द्वारा ही अपने भावों का व्यक्तीकरण करता रहा होगा।[४]

भाषा के विकास में निपातों की इस महत्त्वपूर्ण स्थिति को ध्यान में रखते हुए जब हम वैदिक साहित्य का अध्ययन करते हैं तो वहाँ पर हम देखते हैं कि निपात प्रायः विविध-अर्थाभिव्यक्ति के लिए प्रयुक्त हुए हैं। एक ही निपात विविध स्थलों पर प्रायः एकाधिक अर्थों में प्रयुक्त हुआ है। सम्भवतः निपातों के इस अर्थ-वैविध्य को दृष्टि में रखते हुए ही प्राचीन आचार्यों ने—"विविध अर्थों में प्रयुक्त या निपतित होने के कारण ही इन्हें 'निपात' संज्ञा दी।"[५]

निपातों की इस परिभाषा से आचार्य यास्क,[६] निरुक्त के टीकाकार आचार्य दुर्ग,[७] ऋक्प्रातिशाख्य-कार,[८] माधवभट्ट,[९] एवं वृहद्देवताकार[१०] आदि आचार्यों की सहमति अभिव्यक्त होती है। किन्तु विस्मय का विषय है कि जहाँ एक ओर आचार्यों द्वारा निपात जैसे भाषा के महत्त्वपूर्ण विभाग को विविधार्था-भिव्यक्ति का श्रेय प्रदान किया गया वहीं दूसरी ओर कुछ आचार्यों द्वारा 'निपातः पदपूरणः' कह कर इसकी उपेक्षा करदी गयी।[११] निपातों के विषय में विद्वानों का यह मत-वैविध्य ही वास्तविक स्थिति जानने के लिए चिन्तन एवं अन्वेषण के द्वार उद्घाटित करता है।

प्रस्तुत संक्षिप्त लेख में इसी विषय पर विचार करते हुए निपातों की मात्र पदपूरण कहकर उपेक्षा करना उचित नहीं है अपितु प्रयुक्त स्थल पर उसके प्रयोग की सार्थकता के चिन्तन की आवश्यकता है। साथ ही वैदिक साहित्य में निपातों का अध्ययन भी वैदिक मन्त्रों एवं स्थलों के गूढार्थ को जानने में सहायक होगा, अतः इनके अध्ययन की आवश्यकता पर प्रकाश डालने का प्रयास किया है।

माधवभट्ट ने ऋग्वेदानुक्रमणी में 'न, वै, किल, नाम, खलु, इत्, आत्, अद्य सीम्, उ, कम्, उत, नूनम्, इव, इङ्, स्म, चित्, घ और च निपातों को अनर्थक माना है।[१२] इन निपातों में से प्रायः सभी निपातों के, वैदिक साहित्य की बात तो दूर है—ऋग्वेद में ही सार्थक प्रयोग मिलते हैं। अतः माधवभट्ट ने किस आधार पर इन निपातों को अनर्थक प्रतिपादित किया है? यह निश्चित रूप से नहीं कहा जा सकता।

विचार करने पर निपातों को अनर्थक कहने का कारण सम्भवतः यह प्रतीत होता है कि कतिपय निपात वेदों में कतिपय स्थलों पर स्पष्ट रूप से किसी विशिष्ट एवं निश्चित अर्थ को प्रकट करते हुए प्रतीत नहीं होते। किन्तु यदि उन स्थलों का सूक्ष्म दृष्टि से अध्ययन किया जाए तो वे ही निपातपूर्ण तथा सार्थक प्रतीत होते हैं। इस कथ्य की पुष्टि माधवभट्ट के कथन से भी होती है क्योंकि वे स्फुट अर्थ वाले निपातों को सार्थक एवं सूक्ष्म अर्थ होने पर पदपूरण मानते हैं।[१३]

वैदिक साहित्य, मुख्यतया वेदों में निपातों का विशिष्ट महत्त्व है । ऋग्वेद विश्वसाहित्य का आदि ग्रन्थ है एवं भाषा तथा भावों की दृष्टि से अत्यन्त समृद्ध है, इस तथ्य को देश-विदेश के प्रायः सभी विद्वान् स्वीकार करते हैं । पुनरपि उसी ऋग्वेद के मन्त्रों में प्रयुक्त निपातों को केवल पदपूरण कहकर उनकी उपेक्षा करना युक्तियुक्त प्रतीत नहीं होता, क्योंकि ऐसी स्थिति में जबकि मन्त्रों के पदों का व्यतिक्रम भी स्वीकार न किया जा सके, एक ही मन्त्र में प्रयुक्त चार अथवा पाँच निपात अनर्थक हों यह बात युक्तियुक्त प्रतीत नहीं होती ।

ऋषि मन्त्रों के द्रष्टा थे उन्हें ईश्वरीय ज्ञान का दर्शन हुआ ऐसी स्थिति में तथा ऋग्वेद की सुसमृद्ध भाषा-शैली एवं उच्च भावयुक्त कल्पना को देखकर यह मानना तर्कसंगत प्रतीत नहीं होता कि वैदिक ऋषियों के अथवा ईश्वर के पास सार्थक पदों का अभाव था, इसलिए उन्होंने छन्दपूर्ति के लिए विभिन्न स्थलों पर अनर्थक निपातों का प्रयोग किया ।

वस्तुतः वेद मन्त्रों की व्याख्या का क्षेत्र विशाल है । वैदिक पदों की व्याख्या अनेक प्रकार से उपलब्ध होती हैं । विभिन्न व्याख्याकार एक ही पद की विविध प्रकार से व्याख्या करते हैं । एक भाष्यकार एक स्थल पर किसी निपात की व्याख्या में उसको अनर्थक अथवा पदपूरणार्थक स्वीकार करता है तो वहीं भाष्यकार उसी को सार्थक एवं वैकल्पिक अर्थों में प्रयुक्त मानता है ।[१४] ऐसी स्थिति में निपातों को अनर्थक या पदपूरण मानना अथवा उनका पदपूरण लक्षण करना समीचीन प्रतीत नहीं होता, अपितु यह कथन वस्तुस्थिति को जानने के लिए प्रेरित करता है ।

'निपात सार्थक हैं' इस कथन की पुष्टि में एक अन्य प्रमाण यह भी दिया जा सकता है कि प्राचीन आचार्यों ने अर्थवान् अक्षर समूह को पद की संज्ञा दी है ।[१५] तथा निपात को एक पद विभाग के रूप में अधिकांश विद्वान् स्वीकार करते हैं ।[१६] अतः निपातों की सार्थकता ही सिद्ध होती है । यदि निपात को हम अनर्थक मानते हैं तो उसे चार प्रकार के पद समूह से पृथक् करना होगा, जो कि प्राचीन आचार्यों को स्वीकार्य नहीं है । अतः निपातों को अनर्थक या पदपूरण कहना युक्तिसगत प्रतीत नहीं होता ।

वैदिक एवं लौकिक संस्कृत साहित्य में निपातों का बहुल प्रयोग हुआ है । लौकिक संस्कृत में प्रयुक्त निपातों को तो फिर भी प्रायः निश्चित अर्थों में प्रयुक्त कहा जा सकता है । किन्तु वैदिक साहित्य में स्थिति भिन्न है । वहाँ किसी निपात विशेष के अर्थ के निर्धारण में ऋग्वेद के भाष्यकार भी एक मत नहीं हैं । भाष्यकारों का यह मत-वैषम्य भी निपातों के अर्थ विवेचन की आवश्यकता को ही प्रदर्शित करता है ।

निपातों के विषय में भाष्यकारों की यह मतभेद की स्थिति मात्र ऋग्वेद में ही नहीं है, अपितु अन्य वेदों में भी रही है । साथ ही प्रातिशाख्य ग्रन्थों द्वारा निपातों को अनर्थक पादपूरण प्रतिपादित करना [१७] एवं निरुक्तकार द्वारा कुछ निपातों को अनेक अर्थों वाला मानना, [१८] वस्तु स्थिति की वास्तविकता को जानने के लिए प्रेरित करता है ।

इसके अतिरिक्त आचार्य यास्क ने निरुक्त में निपातों पर विचार करते हुए अन्त में उनके सूक्ष्म एवं सर्वांगीण अध्ययन की आवश्यकता पर बल दिया है ।[१९] माधवभट्ट ने भी यद्यपि ऋग्वेदानुक्रमणी में निपातों पर अपेक्षाकृत विस्तार से विचार किया है, क्योंकि वहाँ उन्होंने 'निपातानुक्रमणी' प्रकरण के छः अध्यायों में निपातों की चर्चा की है, जिनमें निपातों के विविध अर्थ उनका सार्थक एवं अनर्थक प्रयोग संख्या तथा अनेकार्थकता आदि विषयों का विवेचन किया है तथापि उन्होंने भी निपातों से सम्बद्ध अनेक

प्रश्नों पर निर्देशात्मक संकेत मात्र देकर उनके समुचित निरीक्षण एवं परीक्षण की आवश्यकता बतायी है।[२०] उनके मत में निपातों के प्रयोग को जानने में कुशल व्यक्ति निपातों के विविध अर्थों की कभी उपेक्षा नहीं करते।[२१]

यह विस्मय का विषय है कि भाषा का महत्त्वपूर्ण अङ्ग एवं वैदिक साहित्य में विशिष्ट महत्त्व होते हुए भी निपातों के साथ सायण प्रभृति भाष्यकारों ने भी पूर्ण न्याय नहीं किया है क्योंकि अनेक स्थलों पर निपातों का अर्थ करते समय अरुचि दिखलाते हुए उन्होंने या तो उस निपात का कोई अर्थ ही नहीं किया।[२२] अथवा इसे पद पूरण मान लिया।[२३] आचार्य मुद्गल ने प्रायः सायण का ही अनुकरण किया है। अनेक स्थलों पर उनका भाष्य सायण भाष्य से अक्षरशः मिलता है। वेंकटमाधव ने अधिकांश स्थलों पर निपात का कोई अर्थ नहीं किया है या फिर मात्र मूल निपात की ही आवृत्ति कर दी है। स्कन्द स्वामी तो अधिकांश निपातों को पदपूरण ही मानते हैं।[२४] किन्तु स्वामी दयानन्द निपातों के अर्थ के विषय में सचेष्ट प्रतीत होते हैं क्योंकि उन्होंने प्रायः सर्वत्र निपातों का कोई न कोई अर्थ किया है।

उक्त विवेचन से स्पष्ट है कि अब तक उपलब्ध प्राचीन आचार्यों की निपात-चर्चा केवल दिग्दर्शन मात्र ही है, उससे निपात विचार की आवश्यकता ही सिद्ध होती है। अतः वैदिक अध्ययन एवं वेद मन्त्रों के अर्थौचित्य की दृष्टि से विविध निपातों के विविध अर्थों के विषय में सूक्ष्म विवेचन एवं सर्वांगीण अध्ययन की महती आवश्यकता है।

सन्दर्भ संकेत

१. चत्वारि पद जातानि नामाख्याते चोपसर्गनिपाताश्च—निरुक्त १/१/८

२. तत्र पदमनेकप्रकारनामाख्यातोपसर्ग निपात कर्मप्रवचनीय भेदात्—व्यक्ति विवेक पृ० २७।

३. ऋ० प्राति १२/१७, वा० प्राति १/१, महाभाष्य—१/१/१, कौटिल्य अर्थ० २/१०/२८।

४. आवेग सिद्धान्त—भाषाविज्ञान—डा० कर्णसिंह, १९७४—पृ० ३६।

५. अथ निपाता उच्चावचेष्वर्थेषु निपतन्ति—निरुक्त १/४।

६. वही।

७. उच्चावचेष्वर्थेषु निपतन्ति, इति निपाताः निरुक्त दुर्गटीका—१/४।

८. निपातानामर्थवशान्निपातनात्—ऋक् प्रातिशाख्य—१२/१५।

९. उच्चावचेषु निपततामर्थेषु यथायथम्—ऋग्वेदानुक्रमणी ३/१/१७।

१०. उच्चावचेषु चार्थेषु निपाताः समुदाहृताः।
वशात् प्रकरणस्यैते निपात्यन्ते पदे-पदे॥ बृहद्देवता—२/९३।

११. (क) निपातः पादपूरण —ऋक् प्रातिशाख्य—१२/८/७०७।
(ख) निपातस्तु अर्थविशेषाभावात् पादपूरणः—वा० प्रा० अनन्त भाष्य ८/५०।
(ग) अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति।
पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति। निरुक्त १/९/३

१२. न-वै-किल-नु-नामाथ खल्विदादधसीमु कम्।
उत् नूनमिवेङ्घस्मचिद्धचाः स्युरनर्थकाः॥ ऋग्वेदानुक्रमणी ३/१/१४।

१३. स्फुटत्वोद्ग्रहणादिश्च क्वचित् सूक्ष्मः क्वचित् स्फुटः।
यत्र स्फुटास्तदा सार्थाः सूक्ष्मे स्युः पूरणा इति॥ ऋग्वेदानुक्रमणी ३/१/१८।

१४. घ इत्यनर्थः प्रसिद्धचर्थो वा—ऋग्वेद सायणभाष्य १/१६१।८।
ह शब्दः पूरणः प्रसिद्धौ वा। वही ४/४१/२

१५. अर्थः पदमेन्द्राणामिति—निरुक्त दुर्गवृत्ति १/१/८
अर्थः पदमाहुरेन्द्राः—सुषेण विद्याभूषण, कलापचन्द्र, सन्धि २०।
अर्थाभिधायि पदम्, पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम्। वाजसनेयी प्रातिशाख्य—उव्वट भाष्य ३/२
१६. (क) चत्वारि पदजातानि नामाख्याते चोपसर्ग निपाताश्च निरुक्त १/१/८।
(ख) नामाख्यातमुपसर्गो निपातः, चत्वार्याहुः पदजातानि। ऋक्प्राति० १२/१७।
(ग) अक्षर समुदायः पदं तच्चतुर्धा। नामाख्यातोपसर्ग निपाताः। वा० प्राति० १/१।
(घ) चत्वारि पदजातानि नामाख्यातोपसर्ग निपाताश्च। महा० भा० १/१/१।
१७ वाज० प्राति० अनन्तभाष्य ८/५०, ऋ० प्राति० १२/८/७०७, ऋग्वेदानुक्रमणी ३/१/१४, निरुक्त १/६/८।
१८. चिदित्येषोऽनेक कर्मा,…नु इत्येषोऽनेककर्मा। निरुक्त १/४/११, १५।
१९. एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः। निरुक्त १/३/११।
२०. उच्चावचेषु निपततामर्थेष्वेषु यथायथम्।
हानोपादान वान्विप्रो न मन्त्रार्थेषु मुह्यति ॥ ऋग्वेदानुक्रमणी ३/१/२७।
२१. निपातानां प्रयोगस्य स्थानं ज्ञात्वा न मुहयति।
अतो लोकानुसारेण निपातार्थं प्रदर्शयेत् ॥ वही ३/३/२१
२२. ऋ० १/१०/१०, ४२/२, १३५/४, २/६/४, ३/२/६, (हिनिपात)
२३. उ इति पादपूरणः ऋ० १/५०/१, सायण भाष्य
हेति पूरणः ऋ० ५/४१/७ सायणभाष्य।
२४. उ सु पदपूरणौ ऋ० स्कन्दस्वामी भाष्य १/३६/१३।
उ इत्येतत् पदपूरणः ऋ० स्कन्दस्वामी भाष्य १/११६/१७

———

प्रवक्ता, संस्कृत विभाग
गुरुकुल काङ्गड़ी विश्वविद्यालय, हरिद्वा

□ डॉ० श्रीनिवास शास्त्री

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्

महाभारतस्येदं वचनम् ।[1] इदं च वायुपुराणे (१.२०१), पद्मपुराणे (सृष्टि० २.५१) चापि दृश्यते, अन्येषु च परवर्तिषु ग्रन्थेषु । क्वचिच्च वेदार्थमुपबृंहयेत् इत्यपि पाठः । उपबृंहणशब्दस्यार्थो विशदीकरणम् । यथाऽऽह रामानुजः उपबृंहणञ्च श्रुतिप्रतिपन्नार्थविशदीकरणम् ।[2] अन्यत्र च स विस्तरेण शब्दमिमं स्पष्टयति—उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थविशदीकरणम् ।[3] स हि उपबृंहणस्य अवश्यकर्तव्यतामपि समर्थयति । इतिहासपुराणाभ्यां किमर्थमुपबृंहणं कार्यम् ? कथं वा कार्यम् ? इत्ययं विषयो नात्र समालोचनीयः, अपितु महाभारतस्यास्मिन् वाक्ये पुराणशब्दस्य कोऽर्थो युक्तिप्रमाणसह इत्येव विमृश्यते ।

सत्यमेवैतद् यत्पुराणशब्दोऽयं लोके विद्वत्समाजे च श्रीमद्भागवतादीनां वाचकत्वेन प्रसिद्धः, श्लोकमिममुद्धृत्य सायणाचार्येण च निरूपितम्—"उपनिषदुक्ताः सृष्टिस्थितिलयादयो ब्राह्मपाद्मवैष्णवादिपुराणेषु स्पष्टीकृताः",[4] तेनेदं प्रतिभाति यदत्र महाभारतवचने पुराणशब्देन ब्रह्मवैवर्त्तादीनि पुराणानि सायणाचार्यस्याभिमतानि; अन्येषामपि चानेकेषां व्याख्याकाराणां तथैवाभिमतम् । तथापि—यदा श्रीमद्भागवतादीनां नामापि नासीत् तादृशे सुदूरप्राचीनेऽपि काले पुराणशब्दस्य प्रयोग उपलभ्यते, सायणप्रभृतयश्चाचार्याः क्वचित् पुराणशब्दस्यान्यमप्यर्थं बोधयन्ति, समीक्षकैश्च महाभारतग्रन्थः श्रीमद्भागवतादिभ्यः प्राचीन इति निर्णीतम्, अतो विचारमर्हत्येवायं विषयः ।

पुराणशब्दस्य प्रयोगोऽतिप्राचीनः । मन्त्रेषु ब्राह्मणेषु चाप्ययं शब्दो बहुश उपलभ्यते । ऋग्वेदस्य केषुचित् स्थलेषु तु स्पष्टमेतद् यत् पुरातनशब्दसमानार्थक एव पुराणशब्दः ।[5] सायणाचार्यप्रभृतिभिश्च वेदभाष्यकारैरपि तत्र चिरन्तनशब्दस्य पुरातनशब्दस्यैवार्थे पुराणशब्दो व्याख्यातः ।[6] स तु नात्र विचारस्य विषयः । परं सन्ति मन्त्रेषु ब्राह्मणेषु च केचन सन्दर्भा यत्रास्य शब्दस्य पुरातनार्थे प्रयोगो न वक्तुं शक्यते तत्र तु विचारणीयं यदयं शब्दः कस्यार्थस्य बोधकः, इति । तद्यथा, अथर्ववेदे श्रूयते—

स बृहतीं दिशमनुव्यचलत् ।।
तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ।।
इतिहासस्य च वै पुराणस्य च गाथानां च नाराशंसीनां च प्रियं
धाम भवति य एवं वेद ।।[7]

एषां मन्त्राणां किञ्चित् प्राचीनं भाष्यं नोपलभ्यते । सायणभाष्यमपि च नोपलब्धम् । स्वामिदयानन्देन मन्त्रोऽयं पूर्वपक्षे समुद्धृतः, न च व्याख्यातः । पूर्वपक्षं समादधता चेदमुक्तम्—"एतैः प्रमाणैर्ब्राह्मणग्रन्थानामेव ग्रहणं जायते न श्रीमद्भागवतादीनामिति । कुतः ? ब्राह्मणग्रन्थेष्वितिहासादीनामन्तर्भावात् ।"[8] अत्र च पुराणशब्दस्य कोऽभिप्रायः ? इत्यस्मिन् प्रसङ्गे ज्ञाप्यते—"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् (छान्दोग्य० प्रपा० ६), आत्मा वा इदमेकमेवाग्र आसीन्नान्यत् किञ्चन मिषत् (ऐतरेयोपनिषद् १.१), आपो ह वा इदमग्रे सलिलमेवास (शत० ११.१), इदं वा अग्रे नैव किञ्चिदासीत्...इत्यादीनि जगतः पूर्वावस्थाकथनपूर्वकाणि वचनानि ब्राह्मणान्तर्गतान्येव पुराणानि ग्राह्याणि" ।[9]

अथर्ववेदेऽन्यत्रापि पुराणशब्द उपलभ्यते । तद्यथा–'ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह' । तत्र च सायणाचार्येणैवं व्याख्यातम्—"पुराणम् पुरातनवृत्तान्तकथनरूपम् आख्यानम्" ।[10] क्वचित्तु 'पुराणवित्' इत्ययमपि प्रयोगः । तत्र चास्य शब्दस्याभिप्रायोऽपि व्यज्यत इव । तद्यथा—

येत आसीद् भूमिः पूर्वा यामद्धातय इद् विदुः ।
यो वै तां विद्यान्नामथा स मन्येत पुराणवित् ॥[११]

अस्य मन्त्रस्य भाष्ये सायणाचार्यः कथयति[१२]—"ताम् अतीतकल्पस्थां भूमिं 'यो वै' यः खलु 'नामथा' नामप्रकारेण तस्यां यद्यद् वस्त्वस्ति तत् सर्वं नामग्राहं 'विद्यात्' जानीयात्······'पुराणवित्' पुरातनस्य अर्थस्य वेदिता स विद्वान् मन्येत इदानीन्तनीमपि सर्वां भूमिं मन्येत जानीयात् ।"

अत्र तु पुरातनस्य अर्थस्य वेदिता एव पुराणवित् कथितः । इत्यञ्चात्र पुरातनोऽर्थः, पुरातनवृत्तान्तो वा पुराणपदस्य बोध्यो न तु कश्चिद् ग्रन्थविशेषः । किञ्चात्रापि जगतः पूर्वावस्थाकथनपूर्वकवचनमेव पुराणशब्दस्यार्थ इति स्वीकर्तुं शक्यते । कथितैवात्र जगतः पूर्वावस्था ।

अयं च पुराणशब्दो गोपथशतपथादिषु[१३] ब्राह्मणग्रन्थेष्वपि बहुशः प्रयुज्यते । तत्र चायम् इतिहासादिशब्दैः साकं दृश्यते । शतपथब्राह्मणे तु पुराणादीनां स्वाध्यायोऽपि स्तूयते ।[१४] तेन चेदं प्रतिभाति यत् पुराणेति कस्यचित् सन्दर्भस्य नाम । अतश्च पुनरपि संशयो जायते यत् तेन नाम्ना किं ब्रह्मवैवर्त्तादीनि पुराणानि ग्राह्याणि, आहोस्विज्जगतः पूर्वावस्थाकथनपूर्वकाणि वचनान्येव । अत्र च संशये प्रमाणनि युक्तयश्च मार्गं दर्शयेयुः ।

तथाहि—सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायामयं तावत् पूर्वपक्षः—"ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते 'यद् वै ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीः' (तै० आ० २।९) इति ।" अस्मिंश्च पूर्वपक्षे आचार्येणोच्यते—"मैवम् । विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात् । देवासुराः संयत्ता आसन् (तै० सं० ५.३.११.१) इत्यादय इतिहासाः । इदं वा अग्रे नैव किञ्चनासीत् (तै० ब्रा० २.२.९.१) इत्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् ।"[१५] अनेन च सायणाचार्यस्य व्याख्यानेन ज्ञायते यद् ब्राह्मणान्तर्गतं जगतः प्रागवस्थाकथनपूर्वकं सर्गप्रतिपादकं वचनमेव पुराणशब्देनाभिधीयते ।

अत्र हि ब्राह्मणावान्तरभागस्य पुराणत्वं ब्राह्मणप्रसङ्गेनैव प्रतिपादितम् । तादृशा मन्त्रावान्तरभागा अपि पुराणशब्दाऽभिधेया इति निवेदितमेव पुरस्ताद् । तथा च ब्राह्मणग्रन्थस्यांशविशेषो पुराणसंज्ञकः मन्त्रांशविशेषश्च । न हि सर्वत्र ब्राह्मणग्रन्थस्यशविशेषः पुराणमिति स्वीकर्तुं शक्यम्; अथर्ववेदेऽपि तादृशस्य पुराणशब्दस्य दर्शनात्, ब्राह्मणग्रन्थानाञ्चाथर्ववेदाद् अर्वाचीनत्वात् । सायणाचार्योऽपि 'ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात्' इत्यत्र आदिशब्दं (ब्राह्मणादि-) गृह्णाति । स्वामिदयानन्देनापि च ब्रह्मयज्ञप्रकरणविषयिकां शङ्कां समादधतैव ब्राह्मणांशविशेषस्य पुराणत्वं प्रतिपादितम् । न हि तत्राथर्ववेदस्थः पुराणशब्दोऽपि लक्षितः । ततश्च मन्त्रेषु ब्राह्मणेषु च प्रागवस्थाप्रतिपादकं वचनमेव पुराणशब्दस्याभिधेयम्, न तु श्रीमद्भागवतादिपुराणम् इति सुवचम् । मन्त्रेषु ब्राह्मणेषु च पुराणम् इत्येकवचनस्य, पुराणानीति बहुवचनस्य वा प्रयोग उपलभ्यते । न तु कस्यचित् प्रचलितस्य पुराणस्य संकेतोऽपि तत्र दृश्यते ।

आस्तां तावन्मन्त्राः ब्राह्मणानि वा । अन्यत्रापि प्राचीने वाङ्मये न क्वचित् श्रीमद्भागवतादीनां संकेतो दृष्टचरः । यद्यपि पाणिनिकृतसूत्रेषु महाभारतस्य कतिपये संकेताः समुपलभ्यन्ते, तथापि तत्र प्रचलितपुराणानां संकेतोऽपि न दृश्यते । महाभाष्यकारेण भगवता पतञ्जलिना वामनजयादित्यादिभिः व्याख्याकृद्भिरपि 'तेन प्रोक्तम्'[१६] कृते ग्रन्थे'[१७] इत्यादिसूत्राणां व्याख्याने न प्रचलितपुराणानामुल्लेखो विधीयते । यत्तु आपस्तम्बधर्मसूत्रे (२.९.२४.६) 'इति भविष्यत्पुराणे' इत्युक्तं तत्रापि न भविष्यत्पुराणसंज्ञकः पुराणविशेषो गृह्यते, अपितु भाविघटनाबोधकं वाक्यमेव । अस्मिंश्चार्थे पुराणं भविष्यम् इति पदजातस्य प्रयोगो महाभारतेऽपि समुपलभ्यते;[१८] इत्यभियुक्ताः ।[१९]

अपि च श्रीमद्भागवतादीनां कालनिर्णयादपि सुनिश्चितमेतद् यन्न केवलं मन्त्रब्राह्मणयोः, धर्मसूत्रेषु वा, अपि तु महाभारतेऽपि प्रचलितपुराणानामुल्लेखो न विद्यते । तथा च विद्वांसो विवेचयन्ति—पुराणानां द्वौ प्रवाहौ, इति प्राचीनवाङ्मये पुराणस्वरूपविषयकविवरणभेदाद् निश्चीयते । प्रथमः प्रवाहो व्यासात् प्राचीनः यत्र पुराणवचनानि अव्यवस्थितानि विकीर्णानि चाऽभवन् । द्वितीयस्तु कृष्णद्वैपायनव्यासाद् आरब्धः, तत एव च पुराणसंहितानां निर्माणं क्रमशश्चोपबृंहणमपि जातम्, इति ।[20] इत्थञ्च यत् समीक्षकैरुच्यते वेदानां धार्मिकभागात् पृथग् इतिहासपुराणस्य काचित् परम्पराऽऽसीत् यतो हि सर्वत्रैव इतिहासपुराणम् इति पृथगेव निर्दिश्यते,[21] तत्रापि पुराणवाक्यानां याऽव्यवस्थिता प्रथमा धारा सैव मन्तुं शक्यते, नान्या । किञ्च कैश्चित् प्रमाणैरेतदपि ज्ञायते यत् व्यासादर्वाचीनाः चतस्रः पुराणसंहिता अभवन् यासु काचित् कृष्णद्वैपायनस्य शिष्येण रोमहर्षणन प्रणीता । ताश्च प्रचलितपुराणानामाविर्भावात् प्रागेव विलुप्ताः । परं प्रचलितपुराणानां कर्तारस्तेषां विषये नितरामनभिज्ञा नासन्, यतो हि ते 'पुराणसंहिता'-'आदिपुराण'—इत्यादिकान् शब्दान् प्रयुञ्जते । अतएव प्रचलितपुराणानां सम्बन्धो व्यासेनापि वक्तुं शक्यते । परमस्य नायमभिप्रायो यत् व्यासकर्तृकाण्येव समुपलभ्यमानानि पुराणानि[22] । वस्तुतः इमानि बहुकर्तृकाणि[23] काले काले च समुपबृंहितानि । एषां ये प्राचीनतमा भागास्ते ख्रीष्टाब्दारम्भकाले विरचिताः । एषामधिकतरभागास्तु षष्ठशताब्दीमारभ्य द्वादशशताब्दीपर्यन्तमेव संकलिताः ।[24]

ततश्चैषां नामापि प्राचीनेषु ग्रन्थेषु नोपलभ्यते । न चैषां संख्याऽपि । यत्तु रामरहस्योपनिषदि 'पुराणेषु अष्टादशसु' इति प्रयोगो दृश्यते तत्तु न किञ्चित्करम् । न तिरोहितमेवोपनिषदोऽवगाहमानानां विदुषां यत् नितरामर्वाचीनेयमुपनिषद् । यच्च महाभारते[25] 'अष्टादशपुराणानाम्' इत्येतत्पदम् दृग्गोचरीक्रियते तदपि श्रीमद्भागवतादिपुराणानां महाभारतात् पूर्वकालभावित्वं न प्रमाणायितुमलं यतो विविधैः प्रमाणैः युक्तिभिश्च निर्धारितमेतत् यत् वर्तमानपुराणग्रन्था महाभारताद् अर्वाचीना एव ।[26] श्रीमद्भागवतपुराणेऽपि चैतद् व्यज्यते यत् महाभारतानन्तरं श्रीमद्भागवतस्य रचनाऽजायत ।

एतदुक्तं भवति प्राचीनवाङ्मये यः पुराणशब्दः प्रयुज्यते न स श्रीमद्भागवतादिपरः । वेदेषु, ब्राह्मणेषु, सूत्रग्रन्थेषु च तस्यान्यार्थपरत्वं सुस्पष्टमेव । महाभारतेऽपि नायं शब्दः प्रचलितपुराणानां संज्ञा, इति प्रमाणैः निश्चीयते । अतश्च इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् इत्यस्मिन् महाभारतवाक्ये पुराणशब्देन श्रीमद्भागवतादिपुराणानि न ग्रहीतुं शक्यन्ते; अपितु महाभारतात् प्राचीना एव केचन सन्दर्भाः । प्रमाणैश्चेदमपि निश्चीयते यत् मन्त्रब्राह्मणयोरागतानि जगतः प्रागवस्थाकथनपूर्वकाणि वचनानि पुरा किल पुराणशब्देनाभिहितानि । विशेषेण तु तादृशानि वचनानि ब्राह्मणेषु समुपलभ्यन्ते । तानि च अन्यब्राह्मणांशवद् वेदोपबृंहकाणि, वेदार्थविशदीकराणि इति यावत्, इत्यत्र न सन्देहस्यावकाशः । कालान्तरेण चान्यैरपि विविधविषयैः सह तादृशानि वचनानि भागवतादिषु प्रचलितपुराणेष्वपि संकलितानीत्यन्यदेतत् ।

सन्दर्भ संकेत

१. आदि०, १. २६७ ।
२. श्रीभाष्यम्, २.१.१ ।
३. तत्रैव, २.१.१ ।
४. ऋग्वेदभाष्यभूमिका (भारतीय विद्याप्रकाशन वाराणसी, १९६९), पृ० १३७ ।
५. पुनः पुनर्जायमाना पुराणी । १. ९२. १० ।
सना पुराणमध्येमि । ३.५४.९,
पुराणमोकः सख्यं शिवं वां । ३.५८.६ ।

यज्ञे जाते पितरो नः पुराणे । १०.१३०.६ ।

६. पुराणी चिरन्तनी, नित्येत्यर्थः । सायणभाष्यम्, ऋग्०, १. ९२.१० ।
पुराण पुरातनम् । सायणभाष्यम्, ऋग्० ३.५८.६ ।

७. अथर्ववेदः, का० १५ सू० ६ मं० १०–१२ ।

८. ऋग्वेदादिभाष्यभूमिका (रामलाल कपूर ट्रस्ट, अमृतसर १९६७), वेदसंज्ञाविचारः, पृ० ९४ ।

९. तत्रैव, पृ० ९४—९५ ।

१०. अथर्ववेदः, का० ११ सू० ७ मं० २४ ।

११. तत्रैव, का० ११ सू० ८ मं० ७ ।

१२. सायणभाष्यम्. अथर्ववेदः, का० ११ सू० ८ मं० ७ ।

१३. (क) गोपथ०, १.१०; २.१० ।
(ख) शतपथ०, ११. ५.६.८; १४.६.१०.६; १३..४.३. १२—१३ ।

१४. (यः) इतिहासपुराणं गाथा नाराशंसीरित्यहरहः स्वाध्यायमधीते मध्वाहुतिभिरेव तद् देवाँस्तर्पयति । ११.५.६.८ ।

१५. ऋग्वेदभाष्यभूमिका, पृ० ६१ ।

१६. अष्टाध्यायी, ४.३.१०१ ।

१७. तत्रैव. ४.३.११६ ।

१८ एतत्ते सर्वमाख्यातं ब्रह्मन् भक्तिमतो मया ।
पुराणं च भविष्यं च सरहस्यं च सत्तम । शान्ति०, ३३९, १०८—१०९ ।

१९ रामशंकर भट्टाचार्यः, पुराणगत वेदविषयक सामग्री का समीक्षात्मक अध्ययन, (हिन्दी साहित्य सम्मेलन, प्रयाग, १९६५) पृ० १७ ।

२० तत्रैव, पृ० ९ ।

२१. The Itihasa and the Purana formed—since they are always separately mentioned—a distinct tradition from that of the Samhitas, the religious literature. T. G. Mainkar. The upabimhana and the Rigveda interpretation (L. D. Institute of Indology, Ahmedabad 9), P. 5

२२. द्र०, पुराणगतवेदविषयक सामग्री का समीक्षात्मक अध्ययन, पृ० २३ ।

२३. तत्रैव, पृ० २३ ।

२४. P. V. Kane, History of Dharmashastra, vol. I, P. 161.

२५. महाभारते–स्वर्गारोहणम्, ५.४७

२६. चिन्तामणिविनायकवैद्यः, महाभारतमीमांसा (हिन्दी भाषानुवाद, बनारस), पृ० ५९ ।

———

भूतपूर्व अध्यक्ष,
दयानन्द अनुसंधान पीठ
(कुरुक्षेत्र विश्वविद्यालय)
ब्रह्मपुरी, मेरठ ।

□ प्रो० विजेन्द्रकुमार तोमर

'ब्राह्मण-साहित्य के अध्ययन का सर्वेक्षण

वैदिक वाङ्मय में ब्राह्मण-साहित्य का विशेष महत्त्व है। ब्राह्मण-साहित्य पर सम्पादन, अनुवाद, संकलन, टिप्पणी, भाष्य, कोश-निर्माण, तुलनात्मक एवं आलोचनात्मक विवेचन तथा सांस्कृतिक अध्ययन के रूप में कार्य हुआ है। प्रस्तुत लेख में ऋग्यजुःसाम और अथर्ववेद के ब्राह्मणों के क्रम तथा प्रथम से अंतिम अध्ययन के प्रकाशित क्रम से सर्वेक्षण प्रस्तुत किया गया है। साथ में प्रत्येक ग्रन्थ की संक्षिप्त विशेषताएँ दी गयी हैं और इसके पश्चात् पाश्चात्य एवं भारतीय विद्वानों के कार्यों का संक्षिप्त मूल्यांकन किया गया है। ब्राह्मण-साहित्य के अध्ययन के सर्वेक्षण से पूर्व हमें 'ब्राह्मण-साहित्य से क्या अभिप्राय है और ब्राह्मणों का प्रतिपादित विषय क्या है ?' यह समझना आवश्यक है—

स्वामी दयानन्द सरस्वती ने अपनी पुस्तक 'अनुभ्रमोच्छेदन' में ब्राह्मण शब्द का अर्थ वेदों के व्याख्यान किया है यथा—

'ब्रह्मणां वेदानामिमानि व्याख्यानानि ब्राह्मणानि।'[1]

प्रो० मॉरिस विन्टरनिट्ज ने 'हिस्ट्री ऑफ इंडियन लिटरेचर' में ब्राह्मण शब्द का जो अर्थ किया है उसका हिन्दी अनुवाद इसप्रकार है--

"ब्राह्मण शब्द का अर्थ है—यज्ञ के विधि-विधानों में कुशल विद्वान् पुरोहितों द्वारा यज्ञों के अवसर पर प्रयोग की जाने वाली संहिता भाग की विधियों का संकलन। समष्टि रूप में इस शब्द का अर्थ है—यज्ञगत पुरोहितों के उच्चारणों एवं विवादों का संग्रह।"[2]

विद्याधर शर्मा गौड़ ने शतपथ ब्राह्मण की भूमिका में ब्राह्मण शब्द का अर्थ 'वेदचतुष्टय मंत्राणां कर्मसु विनियोजकः कर्मविधायको नानाविधानादीतिहासाख्यानबहुलोज्ञानविज्ञानपूर्णो भागो ब्राह्मणभाग' किया है।[3]

थोड़े शब्दों में कहे तो वेद मन्त्रो एवं 'यज्ञ-विज्ञान' का गम्भीर विवेचन करने वाले ग्रन्थ ही ब्राह्मण हैं।

ब्राह्मणों में मुख्यतः कर्मकाण्ड सम्बन्धी विधानों के वर्णन के साथ-साथ वेदमन्त्रों और वैदिक शब्दों की निष्पत्ति बतायी गयी है। इसके अतिरिक्त यज्ञ सम्बन्धी अनुकरणीय एवं निषेधात्मक बातों का वर्णन किया गया है। कहीं-कहीं ब्रह्मतत्त्व के विषय में विचार हुआ है। यज्ञीय विषयों की पुष्टि में ऋषियों, आचार्यों एवं राजवंशों की आख्यायिकाएँ (कथाएँ) दी गयी हैं। ब्राह्मणग्रन्थों की एक बड़ी विशेषता यह भी है कि उनमें तात्कालिक मानवजाति के सामाजिक, धार्मिक और नैतिक जीवन की परम्परा का पता लगाने के लिए पर्याप्त अनुसंधानोपयोगी सामग्री मिलती है। पं० बलदेव उपाध्याय ने ब्राह्मणों के वर्ण्य विषय को प्रस्तुत करते हुए लिखा है कि—"ब्राह्मणों में मन्त्रों, कर्मों एवं विनियोगों की व्याख्या है। ब्राह्मणों की अन्तरंग परीक्षा करने पर स्पष्ट है कि ब्राह्मण-ग्रन्थ यज्ञों की वैज्ञानिक तथा आध्यात्मिक मीमांसा प्रस्तुत करने वाला एक महनीय विश्वकोश है।"[4]

पं० भगवद्दत्त जी ने 'वैदिक वाङ्मय का इतिहास' पुस्तक में 'ब्राह्मण-ग्रन्थों का प्रतिपादित विषय'

इस शीर्षक से एक पृथक् अध्याय लिखा है जिसमें प्रमाणपूर्वक ब्राह्मणों में वर्णित आत्मा के अस्तित्व, पुनर्जन्म, प्रजापति = पुरुष = ब्रह्म, गृहस्थाश्रम में स्त्री का स्थान, विवाह, सत्य, यज्ञ द्वारा पापमुक्ति, यज्ञ का स्वरूप, यज्ञ के भेद, देवता, विज्ञान सम्बन्धी विषय यथा समुद्र, सूर्य प्राणापान, वर्षा, रेखागणित के ज्ञान आदि पर प्रकाश डाला गया है।[५] उपर्युक्त सभी दृष्टियों से ब्राह्मणों का अध्ययन महत्त्वपूर्ण रहा है।

यद्यपि भारतवर्ष के प्राचीन आचार्यों ने ब्राह्मणों पर अपने भाष्य लिखकर बहुत बड़ा कार्य किया है। तथापि ब्राह्मणों को सर्वजन सुलभ कराने का श्रेय आधुनिक काल में पाश्चात्य विद्वानों को प्राप्त होता है। नीचे ब्राह्मण-साहित्य सम्बन्धी सम्पादन, अनुवाद एव अध्ययन आदि का सर्वेक्षण ऋग्वेद के ब्राह्मणों से आरम्भ किया जा रहा है—

ऋग्वेद के दो ब्राह्मण हैं—ऐतरेय और कौषीतकि। ऐतरेय ब्राह्मण का अंग्रेजी अनुवाद एवं विस्तृत भूमिका सहित प्रथम सम्पादन मार्टिन हॉग ने बम्बई से १८६३ ई० में किया। इसके पश्चात् टी० आफ्रैक्ट ने सायण भाष्य, ऋग्वेद मन्त्रों की अनुक्रमणी तथा टिप्पणियों सहित एक आलोचनात्मक संस्करण बॉन से १८७९ ई० में सम्पादित किया, जिसका दूसरा संस्करण १९७२ ई० में निकला। राजाराम शास्त्री ने आनन्द आश्रम पूना से सायण भाष्य सहित ऐतरेय ब्राह्मण का १८९५ ई० में सम्पादन किया जिसके बाद में १९५६, ५८ व १९६३ ई० में तीन संस्करण और निकले। गणेश शास्त्री ने भी पूना से १८९६ ई० में ऐतरेय ब्राह्मण को दो भागों में प्रकाशित कराया जिसका एक और संस्करण १९३१ ई० में निकला। सत्यव्रत सामश्रमी ने १८९६ से १९०६ ई० तक कलकत्ता से सायणभाष्य युक्त ऐत० ब्रा० का सम्पादन किया, यह पुनः १९५२ ई० में भी छपा। ए० बी० कीथ ने अंग्रेजी अनुवाद एवं महत्त्वपूर्ण भूमिका सहित कैम्ब्रिज से १९२० ई० में ऐत० ब्रा० का सम्पादन किया, जिसके १९३१ व ३२ ई० में दो संस्करण और निकले। १९६९ ई० में मोतीलाल बनारसीदास, दिल्ली से इसका पुनर्मुद्रण हुआ। इसके अतिरिक्त अनन्त कृष्णशास्त्री ने सुखप्रदा टीका एवं षड्गुरुशिष्यवृत्ति सहित ऐत० ब्रा० का १९४२ से १९५५ ई० तक सम्पादन कराया। पं० गंगाप्रसाद उपाध्याय का एक ऐत० ब्रा० का हिन्दी अनुवाद भी बनारस से प्रकाशित हुआ है। ऋग्वेद के ब्राह्मणों के आलोचनात्मक अध्ययनों में १९०६ ई० में पं० सत्यव्रत सामश्रमी ने कलकत्ता से 'ऐतरेयालोचनम्' नामक अध्ययन प्रस्तुत किया, जिसमें तात्कालिक भौगोलिक एवं ऐतिहासिक वर्णन भी किया गया। ऐतरेय ब्राह्मण के 'हरिश्चन्द्रोपाख्यान' पर सायण भाष्य, हिन्दी अनुवाद एवं महत्त्वपूर्ण भूमिका सहित बनारस से उमाशंकर शर्मा ने एक अध्ययन प्रस्तुत किया। सी० कुन्हनराजा ने मद्रास से षड्गुरुशिष्य, गोविन्द स्वामी और भट्ट भास्कर के भाष्यों एवं टिप्पणियों सहित १९४० ई० में 'द कमेन्ट्रीज़ ऑन द ऐत० ब्रा०' नामक अध्ययन प्रकाशित कराया। पी० के० नारायण पिल्लई ने 'एन एक्जामिनेशन ऑफ वेरियेन्टस् इन लेटर संहिताज़ ऑफ मन्त्राज़ साइटिड बाई प्रतीकाज़ इन द ऐत० ब्रा० एण्ड नॉट ट्रेस्ट टू द ऋग्वेद' १९४३ ई० में प्रकाशित कराया।[६] डॉ० मंगलदेव शास्त्री ने भी 'ऐतरेय और कौषीतकि पर्यालोचनम्' नामक अध्ययन प्रस्तुत किये। जे० एन० शैंडे ने १९६३ ई० में द अग्निहोत्र एण्ड अदर प्रैक्टिसीज़ इन द ब्राह्मण ऑफ ऋग्वेद' प्रकाशित कराया। इन्होंने ही १९६४ ई० में 'सोम इन द ब्राह्मणाज़ ऑफ ऋग्वेद' नामक अध्ययन प्रकाशित कराया जिसमें सोम को सूर्य, वर्ष, इन्द्र, विष्णु, अन्तरिक्ष चन्द्रमा और राजा सिद्ध किया है। इसके साथ ही एक और अध्ययन 'द ब्रह्मनस् इन द ब्राह्मणाज़ ऑफ द ऋग्वेद' भी प्रस्तुत किया, जिसमें ब्राह्मणों के पौरोहित्य का राजाओं पर प्रभाव प्रदर्शित किया गया है। सुरेशदेव ने 'ऋग्वेदस्य ब्राह्मणस्य सायनस्यम्' नामक अध्ययन १९६६ ई० में प्रकाशित किया। जयपुर से डा० नाथूलाल पाठक ने १९६६ व ६७ ई० में क्रमशः 'ऐतरेय ब्राह्मण का

एक अध्ययन और 'ऐतरेय ब्राह्मण के इतिवृत्तात्मक आख्यान' हिन्दी में प्रकाशित कराये। इन्दुमुखोपाध्याय ने भी १९६६ ई० में पूना से स्टोरीज़ इन द ऐतरेय ब्राह्मण' प्रकाशित कराया। १९६९ ई० में एस० जी० साठे ने 'द ऐतरेय ब्रह्मण एण्ड द रिपब्लिक' नामक अध्ययन प्रकाशित किया जिसमें आर्यों तथा प्लेटों के गणतन्त्र, न्यायव्यवस्था आदि पर तुलनात्मक विचार व्यक्त किये गये। इसके पश्चात् बी० एल० जोशी का 'ए क्रिटीकल नोट ऑन कीथस् इगलिश ट्रांसलेशन ऑफ ऐतरेय ब्राह्मण' छपा जिसमें कीथ के संस्करण की आलोचना प्रस्तुत की गयी। १९७२ ई० में एच० आर० कर्णिक ने पूना से ऐतरेय ब्राह्मण की प्रथम दो पंचिकाओं पर एक ग्रन्थ लिखा जिसमें हव्य आहुति आदि पर प्रकाश डाला गया। चौखम्बा संस्कृत संस्थान वाराणसी में ऐत० ब्रा० सायणाचार्य के भाष्य सहित सुधाकर मालवीयकृत सरल हिन्दी टीका युक्त चार पंचिकाओं तक उपलब्ध है।

ऋग्वेद के दूसरे ब्राह्मण कौषीतकि अथवा शांखायन पर भट्ट विनायक ने भाष्य किया है। इस भाष्य के सम्बन्ध में पं० यु० मीमांसक के साथ वार्तालाप करने पर पता चला है कि इसका उत्तरार्द्ध भाग तथा कुछ पृष्ठों की हिन्दी व्याख्या सरस्वती पुस्तकालय बनारस में है। कौषीतकि ब्राह्मण का प्रथम सम्पादन बी लिण्डनर द्वारा जेना से १८८७ ई० में किया गया। शांखायन ब्राह्मण के नाम से हरिनारायण शास्त्री ने आनन्द आश्रम पूना से १९११ ई० में इसे सम्पादित किया। ए० बी० कीथ ने १०० पृष्ठों वाली महत्त्वपूर्ण भूमिका एवं अंग्रेजी अनुवाद सहित कैम्ब्रिज से १९२० ई० में ऐत० ब्रा० तथा कौषीतकि ब्रा० का प्रकाशन किया। इसके पश्चात् श्रीकृष्ण शर्मा ने केरल से प्राप्त पाण्डुलिपियों के आधार पर जर्मनी विस्बेडन से इसका १९६८ ई० में सम्पादन किया। कलकत्ता संस्कृत कालेज रिसर्च सीरीज़ के अन्तर्गत हरिनारायण भट्टाचार्य द्वारा बंगाली अनुवाद सहित १९७० ई० में भी इसका सम्पादन किया गया जिसकी एक प्रति मैंने भारतीय पुरातत्त्व विभाग के दिल्ली पुस्तकालय में देखी है। १९५४ ई० में केवलानन्द सरस्वती द्वारा 'कौषीतकिब्राह्मणारण्यकविषयकोषः' भी ५१ पृष्ठों में बड़े आकार में प्राज्ञ-पाठशालामण्डल वाई से प्रकाशित कराया। कौषीतकि ब्राह्मण पर हुए अध्ययनों में डब्ल्यू कैलेंड का 'नोट्स आन द कौषीतकि ब्राह्मण' १९३२ ई० में छपा, जिसमें कीथ के संस्करण पर आलोचनात्मक सुझाव दिये गये। १९७० ई० में हुकमचन्द पटियाल ने बडौदा से 'रिमार्कस् ऑन द न्यू एडिसन ऑफ द कौषीतकि ब्राह्मण' प्रकाशित कराया।

शुक्ल यजुर्वेदीय माध्यन्दिन शतपथ ब्राह्मण पर पूरे ब्राह्मण-साहित्य में सबसे अधिक सम्पादन एवं अध्ययन हुआ है। हरिस्वामी, उव्वट, सायण, द्विवेदगंग और कवीन्द्राचार्य ने इस पर भाष्य लिखे हैं। शतपथ ब्राह्मण का प्रथम सम्पादन ए० वेबर ने सायण, हरिस्वामी एवं द्विवेदगंग के संक्षिप्त भाष्य और अंग्रेजी भूमिका सहित लन्दन से १८५५ इ० में किया। जुलियस एग्गलिंग ने चार भागों में १८८२ ई० से १९०० ई० तक इसका अंग्रेजी अनुवाद ऑक्सफर्ड विश्वविद्याय प्रैस से प्रकाशित कराया। सत्यव्रत रामश्रयी ने सायण भाष्य सहित इसे 'बिब्ल्योथिका इंडिका' के अन्तर्गत ९ भागों में १८९९ से १९११ ई० तक कलकत्ता से प्रकाशित कराया। सत्यप्रकाश ने इसे 'रत्नाकुमारी पब्लिशिग सीरिज दिल्ली से १९१९ ई० में प्रथम से चार तथा १९६७ ई० में ५ से १० भागों में प्रकाशित कराया। चिन्न स्वामी शास्त्री ने भी १९३७ ई० में ५० पाठभेदों सहित शतपथ ब्राह्मण का सम्पादन किया। पं० चन्द्रधर शर्मा द्वारा भी १९३७ ई० में ही वाराणसी से शतपथ ब्राह्मण का सम्पादन किया गया। सी० एस० चौधरी और यू० गौड़ ने बनारस से ही १९३८ ई० में इसका प्रकाशन किया। १९४० ई० में सायण, हरिहर और गंगविष्णु के भाष्यों सहित श्री कृष्णदास ने पाँच खण्डों में वेंक्टेश्वर स्टीम प्रैस बम्बई से इसे प्रकाशित कराया। १९५९ ई० में अजमेर से भी इसका प्रकाशन हुआ। १९७० ई० में पं० गंगा प्रसाद

उपाध्याय द्वारा हिन्दी अनुवाद एवं अंग्रेजी भूमिका सहित महालक्ष्मी पब्लिशिंग हाऊस नई दिल्ली से तीन भागों में प्रकाशित कराया गया। १९७३ ई० में स्वामी समर्पणानन्द द्वारा शतपथ ब्राह्मण के प्रथम काण्ड का हिन्दी अनुवाद दयानन्द संस्थान नई दिल्ली से प्रकाशित हुआ। इस ब्राह्मण पर हुए अध्ययनों में सर्वप्रथम अध्ययन गुरुकुल कांगड़ी से १९२९ ई० में 'शतपथ ब्राह्मण में एक पथ' पं० बुद्धदेव विद्यालंकार ने प्रस्तुत किया। डब्ल्यू कैलेंड ने १९३२ ई० में 'ए नोट ऑन द शतपथ ब्राह्मण' प्रकाशित कराया जिसमें अश्वमेध यज्ञ आदि पर विचार प्रकट किये गये। १९३९ ई० में एच० आर० कर्णिक का 'सम मोरल टेल्स इन द शतपथ ब्राह्मण' बम्बई से छपा। इसी का १९४० ई० में आलोचनात्मक भूमिका सहित तिरुपति से प्रकाशन हुआ। एच० आर० कर्णिक के कुछ लेख भी प्रकाशित हुए।[9] मंगलदेव शास्त्री के 'शतपथ ब्राह्मण के भाष्यकार हरिस्वामी और ऋग्वेद के भाष्यकार स्कन्द स्वामी का काल' तथा 'शतपथ ब्राह्मण पर्यालोचनम्' क्रमशः १९४१ व १९६७ ई० में छिपे। इसके पश्चात् आर० जी कोलेंज तथा ए० डे० के 'श्रीमद्योगीश्वरयाज्ञवल्क्यदर्शन' और 'शतपथ-परिचय' मराठी भाषा में हुबली से १९४३ ई० में प्रकाशित हुए। पं० भगवद्दत्त का 'शतपथब्राह्मणभाष्यम्' भी छपा है जिसमें प्रथमकाण्ड व हविर्यज्ञ पर हिन्दी में आलोचना की गयी है। पं० भगवद्दत्त जी का ही 'वैदिक वाङ्मय का इतिहास भाग दो' (ब्राह्मणों के भाष्यकार) एक उच्चकोटि का शोध-ग्रन्थ है, जो १९२७ ई० में छपा है। इसी का एक संशोधित संस्करण १९७४ ई० में उनके पुत्र पं० सत्यश्रवा ने प्रणव प्रकाशन दिल्ली से 'वैदिक वाङ्मय का इतिहास (ब्राह्मण तथा आरण्यक ग्रन्थ) नाम से प्रकाशित किया है। ब्राह्मण ग्रन्थों पर शोध-कार्य करने वाले को इससे बहुत सहायता मिलती है। इसके पश्चात् आरमण्ड मिनाड का 'सुरलॉ डिविजन्स डू शतपथ ब्राह्मण लुई रेणु की आलोचना सहित छपा। माईलियस क्लॉज का बेन से १९६७ ई० में 'द इडैन्वैल्ट डेस शतपथ ब्राह्मण' बहुदेवतावाद और मैक्समूलर के दार्शनिक विचारों पर आलोचनात्मक ग्रन्थ प्रकाशित हुआ। कार्लहॉफमैन का 'टैक्स्ट क्रीटीज़ नोटेन सु शतपथ ब्राह्मण' १९६८ ई० में जर्मनी से प्रकाशित हुआ। नर्गिस वर्मा ने भी पूना से 'द एटीमॉलॉज़ीज रिलेटिंग टू द मीटर्स एण्ड मैलॉडीज़ इन द शतपथ ब्राह्मण' १९७२ ई० में प्रकाशित कराया। सस्वर शतपथ ब्राह्मण का सम्पादन म० म० श्री चिन्नस्वामी शास्त्री ने एक से सात काण्ड तक किया है जो अब चौखम्बा संस्कृत संस्थान वाराणासी में उपलब्ध है। यही से सायण भाष्य सहित शतपथ ब्राह्मण पांच भागों में छपा है। पं० मोतीलाल शास्त्री कृत शतपथ ब्राह्मण हिन्दी विज्ञान भाष्य प्रथमकाण्डानुगत दो खण्डों में उपलब्ध है जो सरस्वती मन्दिर, दुर्गापुर रोड़ जयपुर से छपा है। पं० मोतीलाल जी ने वैज्ञानिक आधार पर विवेचन किया है। उर्मिला शर्मा ने नई दिल्ली से १९८१ ई० में शतपथ ब्राह्मण का सांस्कृतिक अध्ययन प्रकाशित कराया है, जिसमें कर्मकाण्ड, धर्म, देव मानव, असुर विवेचन, समाज, राज्य एवं वर्ण व्यवस्था, आर्थिक जीवन एवं १४० उपाख्यानों पर प्रकाश डाला गया है। इसके अतिरिक्त पूना से शतपथ ब्राह्मण पर भाषावैज्ञानिक शोध कार्य (पी-एच० डी०) के रूप में हो रहा है। छोटे लेखों का सर्वेक्षण यहाँ प्रस्तुत नहीं किया गया है। यह ब्राह्मण सबसे अधिक प्रचलित एवं सुलभ प्रतीत होता है। इसी कारण इसका सम्पादन एवं अध्ययन अनेकों विद्वानों द्वारा किया गया है।

शुक्ल यजुर्वेदीय काण्वशतपथ ब्राह्मण जो कि काण्ड विभाग या वाक्य रचना के स्वल्प भेद को छोड़कर माध्यन्दिन शतपथ ब्राह्मण के समान है, पर नीलकण्ठ ने भाष्य किया है। डॉ० कैलेंड ने पंजाब संस्कृत सीरिज़ के अन्तर्गत १९२६ ई० में इसका एक मात्र सम्पादन किया है जिसे आचार्य रघुवीर ने दो अन्य खण्डों में १९३९ ई० में पूर्ण किया। इस पर नहीं के बराबर ही अध्ययन हुआ है।

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मण पर भवस्वामी, कौशिक भट्ट भास्कर, रामाग्निचित और सायण ने भाष्य किये हैं। इसका प्रथम सम्पादन राजेन्द्रलाल मित्र ने कलकत्ता से तीन भागों में १८५९ से १८९० ई० तक किया है। सायण भाष्य सहित नारायण शास्त्री ने पूना से १८९८ ई० में इसका सम्पादन किया जो १९२७ व १९३८ ई० में पुनर्मुद्रित हुआ। एल सोमयाजी ने भी तैत्तिरीय ब्राह्मण का तेलगुलिपि में सम्पादन किया। १९०० से १९०२ तक तैत्तिरीय ब्राह्मण ग्रन्थ लिपि में विद्यानाथ शास्त्री द्वारा सम्पादन किया। इसके पश्चात् भट्ट भास्कर भाष्य सहित मैसूर से चार भागों में १९०८ से १९२१ ई० तक प्रकाशित किया गया। लाहौर से १९२८ ई० में सी० वी० वैद्य ने तैत्तिरीय ब्राह्मण प्रकाशित कराया। पॉल एमिल डयूमॉन्ट ने भी फिलाडेलफिया से १९४८ ई० में दूसरे व तीसरे काण्ड का अंग्रेजी अनुवाद सहित प्रकाशन कराया। सायण भाष्य सहित तीन भागों में इसका अभी नया सम्पादन चौखम्बा संस्कृत संस्थान वाराणसी से भी हुआ है। इस पर सी० जी० काशीकर ने १९६८ ई० में 'द तैत्तिरीय ब्राह्मण इन रिलेशन टू द सूत्रकारज़' नाम से किया है। डा० रमेश कुमार लौ ने भी मेरठ विश्वविद्यालय से पी-एच० डी० के रूप में तैत्तिरीय ब्राह्मण का भाषा वैज्ञानिक अध्ययन प्रस्तुत किया है।

कृष्णयजुर्वेदीय २३ काठक ब्राह्मणों का सम्पादन डा० सूर्यकान्त ने लाहौर से १९४३ ई० में किया है।[८]

चरितम्-श्रीशिखगुरुचरितामृतम्-महाराणाप्रतापसिंहचरितम्-श्रीरामदासचरितम्–राजस्थानसतीनवरत्नहारः–महाराष्ट्रस्त्रियवीररत्नमंजूषा, सौराष्ट्रवीररत्नावलिः तथा महाराष्ट्रवीररत्नमंजूषा, गङ्गाप्रसादोपाध्यायस्य आर्योदयम्, महामहोपाध्यायपण्डितरामावतारशर्म्मणो भारतगीतिका भारतीयमितिवृत्तं च, मूलशङ्करमाणिक्लाल याज्ञिकस्य प्रतापविजयं छत्रपतिसाम्राज्यं च, पण्डिताक्षमायाः सत्याग्रहगीता–उत्तरसत्याग्रहगीता–शङ्करजीवनाख्यानम्–श्रीतुकारामचरितम्–स्वराज्यविजयः श्रीरामदासचरितं च, श्रीहरिनन्दनभट्टस्य सम्राट्चरितम्, श्रीनिवासशास्त्रिणश्चन्द्रमहीपतिः, मथुराप्रसाददीक्षितस्य वीरप्रतापनाटकम्-भारतविजयनाटकम्-वीरपृथ्वीराजविजयनाटकम् तथा गान्धीविजयनाटकम्, रङ्गाचार्यस्य श्रीशिवाजीविजयम्, नारायणपतित्रिपाठिनः श्रीभारतमातृमाला, पञ्चाननतर्करत्नस्य अमरमङ्गलम्, जीवन्यायतीर्थस्य चण्डताण्डवम्-महाकविकालिदासम्-साम्यतीर्थम्-विवेकानन्दचरितम् एवं स्वातन्त्र्यसन्धिक्षणः, चिड्गुड्डरवरदाचारियरस्य सुषुप्तिवृत्तम्, मेधाव्रतस्य दयानन्ददिग्विजयम्-मातः का ते दशा-लालबहादुरशास्त्रिप्रशस्तिः-चित्तौड़दुर्गम्-तद्भारतवैभवम् तथा प्रकृतिसौन्दर्यम्, हरिदाससिद्धान्त वागीशस्य वङ्गीयप्रतापम्-मेवाड़प्रतापं शिवाजीचरितं च, वासुदेवद्विवेदिनो भोजराज्ये संस्कृतसाम्राज्यम्-कौत्सस्य गुरुदक्षिणा स्वर्गीयसंस्कृतकविसम्मेलनं च, ब्रह्मश्री कपालीशास्त्रिणो भारतीस्तवः, श्रीनिवासताडपत्रीकरस्य गान्धीगीता, बालकृष्णभट्टस्य कनकवंशं स्वतन्त्रभारतं च, रमाकान्तोपाध्यायस्य दयानन्दचरितम्, रामकृष्णभट्टस्य स्वातन्त्र्यज्योतिः राष्ट्रध्वजश्च, जयरामशास्त्रिणो जवाहरवसन्तसाम्राज्यं, श्रीगान्धिबान्धवं च, स्वामिभगवदाचार्यस्य श्रीमहात्मगान्धिचरितम, क्षत्रे विश्वनाथकेशवस्य अपूर्वः शान्तिसंग्रामः-श्रीसुभाषचरितम्-प्रतापशाक्तम्-शिक्षणम्-जवाहरस्वर्गारोहणम्-अन्वर्थको लालबहादुरोऽभूत् तथा श्रीविवेकानन्दचरितम्, कपिलदेवद्विवेदिनः परिवर्तनम्, महादेवपाण्डेयस्य भारतशतकम्, नीरपाजेभीमभट्टस्य काश्मीरसन्धानसमुद्यमः हैदराबादविजयं च, रामनिरीक्षणसिंहस्य स्वाधीनभारतम्, द्विजेन्द्रनाथविद्यामार्त्तण्डस्य स्वराज्यविजयम्, डॉ० श्रीधरभास्करवर्णेकरस्य मन्दोर्मिमाता-प्रश्नावलीविमर्शः-जवाहरतरङ्गिणी-मातृभूलहरी-स्वातन्त्र्यवीरशतककम्-श्रीशिवराज्योदयम्-विवेकानन्दविजयम्-शिवराजाभिषेकम्-अध्यात्मशिवायनं तथा श्रमगीता, लीलारावदयालायाः कटुविपाकः-स्वर्णपुरवृषीवलाः-वीरभा तथा जयन्तु कुमाऊँनीयाः, नारायणशास्त्रिकाङ्करस्य स्वातन्त्र्ययज्ञाहुतिः, वासुदेवशास्त्रिवागेवाडीकरस्य क्रान्तियुद्धम्, भागीरथप्रसादत्रिपाठिनः वृषकाणां नागपाशः, पी० गोपालकृष्णभट्टस्य महाराज्ञीझाँसीलक्ष्मीवायी, सुबोधचन्द्रपन्तस्य झाँसीश्वरीचरितम्, यतीन्द्रविमलचौधरेः भारतहृदयारविन्दम्–महिमामयभारतम्–मेलनतीर्थम्–भारतविवेकम्–भारतराजेन्द्रम्–सुभाषसुभाषम्-देशबन्धुप्रियम्-भारतजनकम्-भारतलक्ष्मीः-भास्करोदयम्-आनन्दराध तथा महाप्रभुहरिदासम्, रमाचौधरेः देशदीपम्-भारततातम्-भारतपथिकम्-भारतवीरं निवेदितनिवेदितं च, हरिहरत्रिवेदिनो नागराजविजयं गणाभ्युदयं च, रुद्रदत्तपाठकस्य भारतीयरत्नचरितम्, भवालकरवनमालायाः पाददण्डम्, शिवप्रसादभारद्वाजस्य भारतसन्देशः–अजेयभारतं कसरिचङ्क्रमं च विद्याधरशास्त्रिणो दुर्बलबलम्, सुरेशचन्द्रत्रिपाठिनो वीरोत्साहवर्धनम्, शशिधरशर्मणो वीरतरङ्गिणी, एस० के० रामचन्द्ररावस्य पोरवदिग्विजयम्, रामकैलाशपाण्डेयस्य प्रबुद्धभारतं भारतं च, के० एन० एलुत्तच्छनस्य केरलोदयः, पुल्लेल श्रीरामचन्द्ररेड्डिनः सुसहतभारतम्, डॉ० उमाशङ्करत्रिपाठिनः क्षत्रपतिचरितम्, श्रीराम भि० वेलणकरस्य प्राणाहुती-रणश्रीरङ्गः-जवाहरचिन्तनम्-स्वातन्त्र्यचिन्तामणी—क्षत्रपतिशिवराजः—लोकमान्यस्मृतिः-कल्याणकोषः—तिलकायनम्–कालिदासचरितं तथा संगीतसोभद्रम्, ज्वालापतिलिङ्गशास्त्रिणः शान्तिदूतः, आचार्य श्रीब्रह्मानन्दशुक्लस्य श्रीगान्धिचरितं श्रीनेहरूचरितं च, श्यामवर्णद्विवेदिनो विशालभारतम्, गोपालशस्त्रिदर्शनकेसरिणः पाणिनीयनाटकं नारीजागरणं च, महामहोपाध्याय हरिहरस्य प्रभावतीपरिणयम्, डॉ० कृष्णलालस्य शिञ्जारवः-उर्वीस्वनः अनन्तमार्गश्च, कृ० वा० चितले संज्ञकस्य भारतस्वातन्त्र्यं लोकमान्यतिलकचरितं च, श्रुतिकान्त-

शर्मणोऽनुवादकृतिरूपं श्रीगुरुगोविन्दसिंहभगवत्पादजीवनेतिवृत्तम्, पलसुलेगजानन बालकृष्णस्य विनायकवीर-गाथा-समानमस्तु मे मनः-हिन्दूसम्राट्स्वातन्त्र्यवीरः-धन्योऽहं धन्योऽहं तथा विवेकानन्दचरितम्, शठकोप-विद्यालङ्कारस्य भारतीविजयम्, भण्डारकरत्र्यम्बकशर्मणः श्रीस्वामिविवेकानन्दचरितम्, कालिकाप्रसादशुक्लस्य अनुवादकृतिरूपो भारतस्य सांस्कृतिको दिग्विजयः, अणे माधवहरेः श्रीतिलकयशोऽर्णवः, डॉ० रेवाप्रसाद-द्विवेदिनः सीताचरितम्, रमाकान्तमिश्रस्य जवाहरलालनेहरूविजयनाटकम्, वङ्गवासिविश्वेश्वरस्य प्रवुद्ध-हिमाचलम्, मधुसूदनशास्त्रिणो हिन्दूविश्वविद्यालयमहाकाव्यम्, डॉ० वीरेन्द्रकुमारभट्टाचार्यस्य कलापिका-शार्दूलशकटम्-शरणार्थिसंवादः कविकालिदासं च, डॉ० रमेशचन्द्रशुक्लस्य गान्धिगौरवम्-लालबहादुरशास्त्रि-चरितम् -बंगलादेशः-भरतचरितामृतम्-विभावनम्-इन्दिरायशस्तिलकम्-सुगमरामायणं तथा चारुचरितचर्चा, यज्ञेश्वर शास्त्रिणो भारतराष्ट्ररत्नम्, डॉ० वोम्मकण्ठिरामलिङ्गशास्त्रिणः सत्याग्रहोदयम्, प्रमुदत्तस्वामिनः पूर्वभारतम्, के० आर० वैशम्पायनस्य देशस्वातन्त्र्यकाले राष्ट्रधर्मः, शिवगोविन्दत्रिपाठिनः श्रीगान्धिगौरवम्, द्वारकाप्रसादत्रिपाठिनो भारतगणराज्यस्य प्रधानमन्त्रिणः-गान्धिनस्त्रयो गुरवः शिष्याश्च तथा अन्तरिक्षनादः, रामकृष्णशर्मणो वंगलादेशोदयम्, रघुनाथप्रसादशर्मणः श्रीजवाहरज्योतिर्महाकाव्यम्, हरदेवोपाध्यायस्य भारतमस्ति भारतम्, श्रीकृष्णसेमवालस्य इन्दिराकीर्त्तिशतकं हिमाद्रिपुत्राभिनन्दन काव्यं च, बलभद्रप्रसाद-गोस्वामिनो नेहरूयशः सौरभम्, डॉ० के० एस० नागराजस्य भारतवैभवम्, श्रीकृष्णजोशिनः श्रीकृतार्थ-कौशिकम्-श्रीपरशुरामनाटकं तथा सत्यसावित्रम्, डॉ० सत्यव्रतशास्त्रिणः इन्दिरागान्धीचरितं तथा थाईदेशविलासम्, चूनीलाल सूदनस्य भगतसिंहचरितामृतं काश्मीरविहरणं च, डॉ० किशोरनाथस्य अनुवाद-कृतिरूपो बापूः, डॉ० शिवसागरत्रिपाठिनः प्राणाहुतिः डॉ० कपिलदेव द्विवेदिनो राष्ट्रगीताञ्जलिः, रामनाथपाठकस्य राष्ट्रवाणी, स्वयम्प्रकाशशर्मणः श्रीभक्तसिंहचरितम्, मुतुकुलं श्रीधरस्य नवभारतम्, अभिराज डॉ० राजेन्द्रमिश्रस्य वाग्वधूटी-राधामाधवीयम्-फण्टूचरितभाणः तथा अकिञ्चनकाञ्चनम, भोजमपि-शुक्लस्य कादम्बरीनाटकम्, डॉ० रमाकान्त शुक्लस्य भाति मे भारतं तथा जय भारतभूमे, डॉ० वी० राघवस्य पुनरुन्मेषः, सहस्रबुद्धेः प्रतीकारम् अब्दुलमर्दनं च, विनायक वोकीलस्य शिववैभवं रमामाधवं च, वेङ्कटरत्नस्य इन्दिराविजयम्, पद्म शास्त्रिणो वंगलादेशविजयम्-स्वराज्यं लोकतन्त्रविजयं च, करमरस्य लोकमान्यालंकारः, श्रीधर वेङ्कटेशस्य मातृभूशतकम्, परमानन्दस्य शिवभारतम् पिण्ड्ये जयरामस्य पर्णालप-र्वतग्रहणाख्यानम्, वेङ्कटेश वामनस्य शिवावतारप्रवन्धः, पुरुषोत्तमकवेः शिवकाव्यम्, केशवपण्डितस्य राजारामचरितम्, दिलीपदत्तशर्मणः प्रतापचम्पूः मुनिचरितामृतं च, एम० के० ताताचार्यस्य भारतीमनोरथम्, वी० आर० लक्ष्मी अम्मलस्य भारतीगीता, रामरायस्य राष्ट्रस्मृतिः, प्रभुदत्त शास्त्रिणः संस्कृतवाग्विजयः, लक्ष्मीनारायणशानभागस्य राष्ट्रपतिगौरवम्, के० वी० एल० शास्त्रिणो महात्मविजयम्, वी० नारायण नायरस्य महात्मनिर्वाणम्, वासुदेवात्मारामलाटकरस्य राष्ट्रपति डॉक्टरराजेन्द्रप्रसादचरितम्, विश्वनाथ-शास्त्रिणो भारतभजनम्, रामकुवेरमालवीयस्य श्रीमालवीयकाव्यम्, बी० एन० दातारस्य अन्तिमयात्रा, साधुशरणमिश्रस्य गान्धिचरितम्, लोकनाथशास्त्रिणो गान्धिविजयम्, श्रीपाद कृष्णमूर्त्तेः राजेन्द्रप्रसादाभ्युदयम्, विद्यानिधिशास्त्रिणः श्रीगान्धिचरितामृतम्, ईशदत्तपाण्डेयस्य प्रतापविजयः, गैरिकपाटि लक्ष्मीकान्तस्य भव्यभारतं भारतरत्नं च, महालिङ्गशास्त्रिणो भारतीविषादः, अमृतकलशस्य हम्मीरप्रबन्धः तथा मानवेदस्य पूर्वभारतचम्पुः इति ।

अस्मिन् सन्दर्भे मया इदमपि निवेदनीयमस्ति यत् प्राचीनसंस्कृतसाहित्यस्येव अर्वाचीनसंस्कृत-साहित्यस्यापि अनेकाः कृतय अधुनापि अप्रकाशिताः एव सन्ति; अनेकाश्च कृतयः प्रकाशिताः सत्योऽपि पर्याप्तं प्रचारं प्रसारं च न लभन्ते ; अतएव सर्वासां कृतीनां प्राप्तेरसम्भवात् मदीयज्ञानस्य च परिसी-मितत्वात् अत्र स्वसमुपदर्शिताम् इमां सूचीम् अहं सम्पूर्णां नैव मन्ये । वस्तुतस्तु एषा सूची सम्पूर्णा भवितुमपि नैव शक्नोति । यतोहि साम्प्रतम् अनेके काव्यकाराः प्रतिदिनं स्वीयया नव्यया भव्यया राष्ट्रभाव-

भरितया कवितया राष्ट्रदेवतायाः सपर्यां कुर्वन्तः सन्ति । अतोऽस्यां सूच्यां वृद्धिस्तु अनारतं भविष्यत्येव । अनया च वृद्ध्या संस्कृतभाषासमुपासकानामपि गौरवं सततं वर्धिष्यते इति मामको दृढो विश्वासः ।

उपरिवर्णितस्यास्य अर्वाचीनसंस्कृतसाहित्यस्य परिशीलनेन इदं तथ्यं प्राकाश्यमायातमस्ति यह एषु काव्यग्रन्थेषु राष्ट्रियभावनानुरूपं क्वचिद् स्वीय राष्ट्रियभौगोलिकसीम्नां रक्षा—सुरक्षादिविषये भावाः प्रकटिताः सन्ति; क्वचित्स्वीयं राष्ट्रं प्रति इतरसर्वविधप्रेमातिशायिनी प्रेमभावना प्रकटितास्ति; क्वचिद् राष्ट्रस्य भौतिकीं, सांस्कृतिकीं तथा आध्यात्मिकीं सम्पत्तिं प्रति आत्मीयतायाः स्वाभिमानस्य च सुदृढाः विचाराः प्रस्तुताः सन्ति; क्वचिद् राष्ट्रस्य विकासकार्येषु निष्ठा प्रदर्शितास्ति; क्वचिद् राष्ट्रस्य कस्यापि क्षेत्रविशेषस्य अथवा जनसमूहविशेषस्य प्राकृतिकीं विपत्तिं स्वीयां विपत्तिं मत्वा यथाशक्ति तन्निरासाय तनुमनोधनैः प्रयत्नाः विहिताः सन्ति; क्वचिद् राष्ट्रियस्य गरिम्णो महिम्नो वा प्रतिष्ठां प्रति अदम्यभावना प्रकटितास्ति; क्वचिद् राष्ट्रस्य प्रगतिकरान् नायकान् प्रति हेतुपूर्वकं समादरभावाः प्रकटिताः सन्ति; क्वचिद राष्ट्रस्य स्वाधीनता—पराधीनताकालीनदशयोः सुख–दुःखविवरणपूर्वकं वैषम्यं प्रदर्शितमस्ति; क्वचिद् हिन्दू-मुसलिमजनानां कृते पारस्परिकैक्यभावनायाः मार्मिकाः प्रसंगाः प्रस्तुताः सन्ति; क्वचिद् राष्ट्रभूमौ मातृभावना संसाधितास्ति; क्वचिद् राष्ट्रभूमौ स्वर्गातिशायिता वर्णितास्ति; क्वचिद् राष्ट्रभूमेः सुजलता, सुफलता, मलयजशीतलता, सर्वविधानन्ददायिता च दर्शितास्ति; क्वचिद् राष्ट्रस्य सीम्नां रक्षां कुर्वतीनां भारतीयसेवानां व्यक्तिगतसुखसौविध्यत्यागात्मकं रोमांचजनकं शौर्यं प्रकटितमस्ति; क्वचिद् राष्ट्रविरोधिनीनां भारतीयसमाजघुणोपमानां कुरीतीनां हानिप्रदर्शनपूर्वकं तन्निरासाय प्रेरणाः प्रदत्ताः सन्ति; क्वचित्पंचशीलोपदेशाः दत्ताः सन्ति; क्वचिद् नराधमानां राष्ट्रद्रुहां निन्दा कृतास्ति; क्वचिद् नरोत्तमानां राष्ट्रभक्तानां प्रशंसा विहितास्ति; क्वचिद् राष्ट्रस्य रक्षोपायाः प्रदर्शिताः सन्ति; क्वचिद् राष्ट्रस्य नीतयो निरूपिताः सन्ति; क्वचिद् राष्ट्रस्य भाषासमस्या निरूप्य समाहितास्ति; क्वचिच्च अन्ताराष्ट्रियभावनायाः अर्थात् विश्वमङ्गलकामनायाः अपि प्रचार-प्रसारयोः विश्वासः प्रकटीकृतोऽस्ति । एवमह पश्यामि यदेषु काव्येषु राष्ट्रियभावनायाः विविधेषु पक्षेषु पर्याप्तः प्रकाशो लभ्यते । एतदतिरिक्तम् अस्मिन्नर्वाचीने संस्कृत-साहित्ये इदमपि तथ्यम् अनावृतं परिलक्ष्यते यद् एतत्कालीने संस्कृतसाहित्ये भारतराष्ट्रस्य सेवापरायणानां प्रगतिकराणां निर्विशेषं प्रजापालकानां समाजसेवकानां राष्ट्रार्पितसर्वस्वानां राजनीतिनायकानां लोकनाय-कानां पोरस–महाराणाप्रतापसिंह–अमरसिंह–क्षत्रपतिशिवाजी–गुरुगोविन्दसिंह–रानीदुर्गावती–झासीरानी लक्ष्मीवायी -महात्मागान्धि-पण्डितजवाहरलालनेहरू-नेताजिसुभाषचन्द्रबोस–सरदारभगतसिंह-चन्द्रशेखरआजाद-लोकमान्य बालगङ्गाधरतिलक-लालालाजपतराय-विनायकदामोदरसावरकर-देशवन्धुचित्तरंजनदास-रफी अहमद किदवई-सीमान्तगान्धि अब्दुलगफारखान-मीरमक्बूलशेरबानी-सरदारवल्लभभाईपटेल-डॉ० राजेन्द्रप्रसाद-युवराज कर्णसिंह-लालबहादुरशास्त्रि-सरोजिनी नायडू-इन्दिरागान्धी-हेमवतीनन्दनबहुगुणा प्रभृतीनां राष्ट्रने-तृणाम्, तथा गुरुनानक-स्वामिदयानन्द-स्वामिविवेकानन्द-समर्थगुरुरामदास-सन्ततुकाराम-योगिराजारविन्द-रवीन्द्रनाथटैगोर-राजाराममोहनराय-भगिनिनिवेदिता-मदनमोहनमालवीय-आचार्य विनोबाभावे सदृशानां भारतीय समाजसुधारकाणां राष्ट्रार्पितानि जीवनचरितानि समवलम्ब्य यानि काव्यानि विरचितानि विरच्यमानानि च सन्ति, तेषु तत्तच्चरितमाध्यमेन सर्वैरेव तत्तत्काव्यप्रणेतृभिः कविवरैः राष्ट्रियभावनायाः विहिता विधीयमाना च साङ्गोपाङ्गाभिव्यंजना तु पाठकानां मनांसि रोमोद्गमजनन पुरस्सर बलादाकर्ष-तीति न कापि संशीतिः ।

मदीयोऽयमनुभवोऽस्ति यद् अर्वाचीनसंस्कृतसाहित्यस्य भूयान् भागो राष्ट्रियभावनया एव ओत-प्रोतोऽस्ति । इतिहासः साक्षी विद्यते यद् भारतीयानां दुर्भाग्येण भारतवर्षो बहुकाल यावत् वैदेशिकानाम् आक्रामकाणां यवनानां तथा कपटकूटपटूनाम् अंग्रेजानाम् आधीन्ये आसीत् । तस्मिन् काले भारतीया संस्कृतिः

सभ्यता, प्रजा भूमिश्च सुतरां विपन्नाः आसन् । अतएव अत्रत्याः देशभक्ताः राष्ट्रियभावनाभिभूताः सम्प्रत्येव उपरिपरिसंख्याताः कतिपयाः संवेदनशीलाः संस्कृतसाहित्यकाराः अनया मर्मच्छेदिन्या पराधीनतापीड़या आहताः भवन्त आसन् । तैरिदम् अनुभूतम्, यद् भारतीयेषु जनेषु यदि राष्ट्रियचेतना नेव जागरिता क्रियते, तर्हि इदं सुविशालं राष्ट्रं सर्वदाकृते पराधीनमेव भविष्यति । अतस्तैः भारतस्य भारतीयतायाश्च रक्षा—सुरक्षाहेतवे देशारातिभिः समं सदा संघर्षकराणां सद्य एवात्र परिसंख्यातानां लोकनायकानां नायकानां समाजसुधारकाणां महापुरुषाणां च जीवनलीलाः आधारीविधाय उपरिपरिवर्णितानि विविधानि राष्ट्रियभावनात्मकानि काव्यानि निर्माय भारतीयेषु जनेषु स्वराष्ट्राभिमानस्य चेतना प्रोद्दीपिता कृतास्ति । अस्मिन्नेव सातत्ये भारतीयतां प्रति गौरववर्धकाणामपि बहूनां काव्यानां सर्जना जातास्ति: जायमानापि चास्ति । यैरसंशयं जनेषु राष्ट्रियभावनायाः उदयविकासौ निरन्तरं जायमानौ स्तः ।

मम मतेन तु अर्वाचीने संस्कृतसाहित्ये राष्ट्रियभावनायाः साम्राज्यमेव विलसति । एतद्युगीनासु अधिकांशवतीषु कृतिषु राष्ट्रियभावनाया एव सर्वाधिकमात्रायां प्राकाश्यमायातास्ति । अनेकाः कृतयस्तु केवलं राष्ट्रियभावनाया एव प्रसारहेतवे लिखिताः सन्ति । फलस्वरूपेण तासु आदितः समारभ्य इति पर्यन्त सर्वत्रैव राष्ट्रियभावना एव स्वीयेषु विविधेषु स्वरूपेषु पाठकानामनुभूतिविषयतां समायाति । अतएव अर्वाचीन-संस्कृतसाहित्यस्य एष युगस्तु अस्माभिः राष्ट्रियभावनायाः स्वर्णिमो युगो वक्तुं शक्यते । उल्लेखनीयमस्ति यद् एतद्युगीने संस्कृतसाहित्ये राष्ट्रियायाः एकतायाः सम्प्रभुतायाश्च रक्षा-सुरक्षोपदेश-सन्देश-समकालमेव राष्ट्रस्य सर्वाङ्गीणविकासकरणार्थमपि उपदेशो लभ्यते; यो हि भारतस्य भारतीयतायाश्च गौरववृद्धये परमोपादेयो विद्यते । अनया दृष्ट्या अत्र परिसख्याताः इमे सर्वे एव राष्ट्रियभावनात्मककाव्यकाराः मम वन्दनीयाः सन्ति । अहं विश्वसिमि, यदेषामेव प्रयासेन भारते संस्कृतभारती भूयः स्वीयां प्रतिष्ठां प्राप्स्यति ।

अन्ते चात्र अहं स्वकीयेभ्यो राष्ट्रनेतृभ्यः तथा शिक्षाविद्भ्यः परामर्शं दातुकामोऽस्मि यत्ते स्वीय-भारतराष्ट्रस्य स्वतन्त्रां सम्प्रभुताम् अक्षुण्णां रक्षितुम, तथा भारतीयेषु भारतीयतां प्रति अनुरागपूर्णं स्वाभिमानं जागरयितुं तथा तेषु स्वीयं राष्ट्रं, स्वराष्ट्रस्य संस्कृतिं, सभ्यतां, भाषां, धर्मं जीवनदर्शनं च प्रति सततं निष्ठोदयं कर्तुं विद्यालयानां, महाविद्यालयानां तथा विश्वविद्यालयानां शैक्षणिकाणां कार्यक्रमाणां माध्यमेन सर्ववर्गीयेषु विद्यार्थिषु राष्ट्रियभावनाभरितस्य संस्कृत-साहित्यस्य प्ररोचनापूर्वकं प्रचार-प्रसारौ कर्तुं कारयितुं च सत्वरं क्रियाशीलाः भवेयुः; तथा प्रौढशिक्षायाः कार्यक्रमेष्वपि अर्वाचीनसंस्कृतसाहित्यस्य राष्ट्रियभावनापूर्णान् कतिपयान् अंशान् सम्मिलितान् कारयेयुः; येन भारतराष्ट्रस्य आबालवृद्धजनेषु एककालावच्छेदेन राष्ट्रचेतनायाः शङ्खो नदेत् तथा विश्वमंचे भारतं शक्तिसम्पन्नम् अजेयम् अभेद्यं च राष्ट्रं सिद्धं भवेत् ।

———

रीडर अध्यक्ष, संस्कृत विभाग
कुमायूँ विश्वविद्यालय
नैनीताल

☐ डॉ० रणजीत शर्मा

आधुनिक संस्कृत महाकाव्यों की प्रमुख प्रवृत्तियाँ

आधुनिक संस्कृत महाकाव्यों की प्रमुख प्रवृत्तियों पर विचार करने से पूर्व यहाँ आधुनिक संस्कृत महाकाव्यों पर भी थोड़ा विचार करना अपेक्षित है क्योंकि जिस अर्थ में, मैं संस्कृत के महाकाव्यों की चर्चा करना चाहता हूँ, उस अर्थ में अभी संस्कृत में 'आधुनिक' शब्द पच नहीं पाया है । मैं 'आधुनिक' शब्द को काल-सापेक्ष और विचार-सापेक्ष दोनों ही अर्थों में ग्रहण करता हूँ । काल-सापेक्ष की दृष्टि से भारत में आधुनिक-काल का प्रवेश लगभग उन्नीसवीं शताब्दी के मध्य-भाग से होता है, जब से इस्ट-इण्डिया कम्पनी से ब्रिटिश-शासन के हाथों में भारत का शासन-सूत्र आया । काल-सापेक्षता में कविता को सार्थक ढंग से पहचानने की क्षमता भी है तथा काल-सन्दर्भों को समझने की विज्ञता और दृष्टि भी है पर विचार-सापेक्ष-पद्धति में आधुनिक की अवधारण में वैज्ञानिक-दृष्टि और तार्किक-चेतना का विवेक तथा अविश्रान्त-जिज्ञासा और 'इदमित्थम्' का निषेध है ।

विज्ञान और तकनीकी का द्रुत-विकास, यातायात और दूर-संचार के साधनों में वृद्धि औद्योगीकरण आदि, जो आधुनिकता के मूल में रहे हैं और जिनका यूरोप में विकास एक शताब्दी पूर्व हो चुका था,— का आगमन भारत में ब्रिटिश-शासन के प्रवेश के साथ-साथ ही हुआ । भारतीय-साहित्य पर भी उसका प्रभाव पड़ा । बंगला और हिन्दी में लगभग तभी से आधुनिकता का यह प्रभाव परिलक्षित होने लगता है । संस्कृत में यह प्रभाव, बीसवीं शताब्दी के प्रथम दशक के जन्म होते ही झलकने लगा । कुछ खींचतान कर आधुनिकता के कुछ तत्त्वों का विखण्डित रूप में इससे पूर्व भी खोजने के प्रयास भी हुए हैं और यत्किञ्चित् शैलीगत बदलाव को 'आधुनिकता' का नाम दिया गया है, परन्तु वहाँ तक महाकाव्यों में वह वैज्ञानिक आधार दृष्टि नहीं आता जिससे आधुनिकता का स्वरूप (उभय पक्ष) उजागर होने में कुछ मदद मिले । अपने प्रस्तुत पत्र में, मैंने बीसवीं शताब्दी के ही संस्कृत के महाकाव्यों को अपने अध्ययन का विषय बनाया है । मेरी धारणा है कि यदि कभी संस्कृत-साहित्य के इतिहास का काल-सापेक्ष वर्गीकरण और नामकरण हुआ तो इसी काल को संस्कृत-साहित्य के इतिहास का ''आधुनिक-काल' स्वीकार किया जायेगा ।

वस्तुतः आधुनिकता एक बदलती हुई जीवन-दृष्टि का नाम है । एक जीवन-दृष्टि पौराणिक थी, एक जीवन-दृष्टि मध्यकालीन थी और इनसे भिन्न एक नई जीवन-दृष्टि आधुनिक है । इस जीवन-दृष्टि के मूल में विज्ञान है, बुद्धि है, राष्ट्रिय चेतना का विवेक है, कैक्टस सा विकसित यथार्थ है, 'स्व' की केन्द्रिता है, स्वायत्तता है और विचारों की सापेक्षता में सामयिक विवेकिता है ।

> मान्यः स मे यः परमो हि धर्मः, परं स सापेक्षतयैव सेव्यः ।
> देवद्रुहां पापकृतां खलानां जानीहि हिंसामपि तामहिंसाम् ॥[1]

अब न तो पौराणिक विश्वासों और आस्थाओं के लिए कोई स्थान है और न ईश्वर को सारे मूल्यों का नियन्ता स्वीकार कर चलने वाली मान्यताओं का ही विशेष अस्तित्व है । 'स्व' में केन्द्रित ''कोई क्या कहता है" की परवाह किए बिना अपनी डगर चलने वाला व्यक्ति तर्क और बुद्धि से संचालित होने लगा है । उसका अपना विवेक ही उसका ईश्वर है । अपनी नियति के लिए वह स्वयं ही जिम्मेदार है । पुराने आदर्शों और विश्वासों की अपेक्षा वह अपने जीवन के यथार्थ को अधिक महत्त्व देता है । अतीत

जीवी होने की अपेक्षा वह वर्तमान में समग्रता से जीना चाहता है। रूढि और परम्पराओं में शोधन करता है और आवश्यकता पड़ने पर विरोध भी करता है, दुर्दम्य जिजीविषा के साथ वह उनका पुनरुत्थान और पुनर् मूल्याङ्कन करता है और मार्ग की बाधाओं का दूर करने का सक्रिय संकल्प भी लेता है। राजनीति से बेझिझक बात भी कर लेता है और नारी-स्वतन्त्र्य एवं उसकी सत्ता की वैचारिक तथा क्रियात्मक वकालत भी कर लेता है। ऐसी इस आधुनिकता का निर्माण एका-एक नहीं हुआ है। मानवी-चेतना के विकास से ही हम यहाँ तक पहुँचे हैं। इसमें डार्विन का विकासवाद, आइंस्टीन का सापेक्षतावाद, मार्क्स का द्वन्द्वात्मक भौतिकवाद, फ्रायड, युंग और एडलर आदि का मनोविज्ञानवाद, सार्त्र का अस्तित्व वाद, तथा अनेक प्रकार के नृवंशीय और सामाजिक चिन्तकों के चिन्तन का प्रभाव है। द्वितीय विश्व-युद्ध ने इसमें प्रमुख भूमिका निभाई है। बढ़ती हुई जनसंख्या और सिमटते हुए जीविका के संसाधनों स्वरूप जीवन में घुटन, टूटन, कुहासा, आक्राश, सन्त्रास और क्षोभ आदि की वृद्धि हुई है।

इस परिप्रेक्ष्य में यदि सस्कृत के महाकाव्यों का अध्ययन करें, तो लगता है कि यह आधुनिकता बीसवीं शताब्दी के महाकाव्यों में उत्तरोत्तर बढ़ती हुई ध्वनित हुई है। यद्यपि अभी भी शिशुता की झलक छुट नहीं पाई है, भले ही स्मर- मित्र यौवन अङ्ग-अङ्ग में झलकने लगा है।

यह आधुनिकता अलौकिकता के स्थान पर मनुष्य को अधिकाधिक महत्त्व देना, परम्परा में शोधन, पुनर्व्याख्यायित कर पुनरुत्थान अथवा पुनर्मूल्यङ्कन, प्रश्नाकुलता और सन्देह, वैचारिता और राजनैतिक चेतना की प्रधानता और सजगता, वैयक्तिकता और सामाजिकता का समन्वय (व्यक्तिवाद पर चोट) यथार्थ के प्रति ललक, राष्ट्रिय-चेतना, स्वत्व के लिये नारी का स्वयं उभर कर आना, आदि प्रवृत्तियों के रूप में अभिव्यक्त हुई है। अब यहाँ इनमें से कुछ प्रवृत्तियों पर विस्तृत विचार अपेक्षित है।

अ—काव्य की दृष्टि से—

मनुष्य को अधिकाधिक गरिमा देना:—आधुनिक संस्कृत महाकाव्यों में मानव को ही केन्द्र मानकर मानव को अधिकाधिक गरिमा देने का प्रयास सर्वत्र है। अवतार या पौराणिक पात्र नर हो या नारी सभी रोजमर्रा देखेभाले जाने वाले जीते-जागते, हाड़-मांस के चरित्र नजर आते हैं। राम, सीता, ऊर्मिला रुक्मिणी, राधा, सावित्री, कृष्ण, अर्जुन, कर्ण प्रभृति चरित्रों को, सामान्य जन की भाँति सन्देह की झूला में झूलते, इधर से उधर, उधर से इधर झोंटे खाते, अन्तर्द्वन्द्व पूर्ण मन: स्थिति में अकुलाते, डुबकी खाते, नूतन जीवन प्रेरणा और मूल्यों की तलाश में हाथ-पैर पटकते देखा जा सकता है।

अवतार चरितों और अलौकिक सत्ता के पृष्ठ पोषक पौराणिक आख्यानों को पुनर्व्याख्यायित करने का सुष्ठु प्रयास आज के महाकाव्यों में हुआ है और हो रहा है।

गुप्तचरी रिपोर्ट से सीता के चरित्र पर संशयालुता से राजा राम खिन्न हैं। दूत-मुख से प्रियतमा सीता के प्रति तिरस्कार में वाविष को पचाने से पूर्व ही मूर्च्छित हो जाना राम का सामान्य जन के धरातल पर उतर आना है। होश में आने पर—

ममैव किन्वत्रपरिच्युतात्मनस्–त्रुटिर्यदेषा जनतास्त्यशिक्षिता।
पितु: स दोष: शिशुरत्ति यद् विषम्–भिषग् हि वाच्यो यदिव वर्धते राजा ॥[२]

यह कैसा दुर्भाग्य है, राक्षस रावण के घर रहने का दुर्भाग्य तो स्वत: प्रमाण है, पर अग्नि शुद्धि नहीं। लगता है—शरीर के नष्ट हो जाने पर भी वह रावण अभी भी लोगों के मन में फायड के आद्य-विम्ब काम के समान सर्वत्र सक्रिय है।

कथन्नृप्सो गृहवास दुर्भगं–स्वत: प्रमाणं न च वह्निशोधनम्।
अवैमि नष्टो वपुषाप्यनङ्गवज्जनान्तरेषु कृती स रावण: ॥[१]

दुराहे पर खड़े 'सीताचरितम्' के राम का समाज-धर्म और वैयक्तिक व्यक्तित्व के अस्तित्व के हित अनिश्चय की स्थिति का चित्र—

समाज धर्मः स्थित एकतोऽन्यतो विभाति वैयक्तिकता च मत्पुरः ।
उदस्यतामत्र लताद्रुमोऽथवा परस्पराश्लिष्टतमात्मनोर्द्वयोः ॥[४]

'रघुवंशम्' और 'उत्तररामचरितम्' से "सीताचरितम्" की सीता अधिक जीवित और अधिक आधुनिक है तभी तो स्वगृहनिष्कासन पर टिप्पणी न करते हुये भी व्यङ्ग्योक्ति कसते हुये कहती है—यदि आपका अक्षय राज्य, सुख-शान्ति के जल से शीतल है, तो उसमें तपन पैदा करने वाली मुझ जैसी तुच्छ, निन्दित नारी का क्या काम है ?

किन्तु देव ! यदि सौख्य वारिभिः शीतमस्ति तवराज्यमंक्षयम् ।
तेन मादृशं विगीतवृत्तिना जन्तुना किमिह तापकारिण ॥[५]

पुरुषत्व और पदत्व के व्यामोह में नारी के अस्तित्व और सत्ता को नकारने या भूलने वाले हर नर को यह एक सभ्य और करारा सबक है। समझौतावादिनी या चुपचाप सहन करते हुए अपने कार्य में लगी रहने वाली परम्पराओं की नारियों से कुछ भिन्न लीकें बनाती हुई सीता स्वतन्त्र और स्वाभिमानिनी नारी बनकर चली है, झुकना वह जानती नहीं। अपना कर्तव्य कर्म निर्वाह करते हुये स्वनिर्मित पथ पर आगे बढ़ी है। वह किसी पर भार बनकर एक क्षण भी रहना पसन्द नहीं करती और न किसी की बाँसुरी बने रहना ही चाहती है।

पुरुषत्व के मोह में नारी की सत्ता के अस्तित्व को नकारने वालों के लिये ऊर्मिला ललकार बनकर आई है। लोकतन्त्र के नाम पर अपनी गद्दी बचाने वालों का नारी पर कलङ्क-वर्षण अथवा लोकतन्त्र में लोक पर ध्यान न रख, केवल तन्त्र पर ही ध्यानावस्थित तथा अपना वर्चस्व, प्रभुत्व और कुर्सीत्व बनाये रखने के लिये नारी का मान-मर्दन ऊर्मिला को कथमपि स्वीकार्य नहीं। नारी की सत्ता और सम्मान बनाये रखने के लिये वह गृहस्थ धर्म से भी बगावत करने को तैयार है, पर इस पहल को वह नारी के हाथ में लेना, देना नहीं चाहती।

पुरुषः स्थितिमीदृशीं यदि प्रतिहन्तुं क्रमते स्वतस्ततः ।
अबला प्रबलत्वमीयुषी किमु न स्याज्जगतीतले ॥[६]

खासतौर से 'अहम्' के घमण्ड में आगा-पीछा न सोच, नारी के चरित्र पर नर जब कीचड़ उछालने पर उतारु हो जाये तो, उसे टकराने में कोई हिचक नहीं, झिझक नहीं। अन्तर्द्वन्द्वपूर्ण मनः स्थिति में 'रुक्मणीहरणम्' की रुक्मणी भी सामान्य नारी की भाँति सन्देहों में डूबती उतराती चित्रित है।

'सीताचरितम्' के राम, सीता और ऊर्मिला जैसे पात्रों की तरह कुछ अन्य महाकाव्यों के पात्र भी जनसामान्य की तरह चित्रित हैं। उदाहरणार्थ एक छोटी सी परिचयात्मक सूची प्रस्तुत है–

डॉ० परमानन्द का 'चीरहरणम्' आधुनिक नारी समस्या पर करारा प्रहार है और 'कौन्तेयम्' अवैध-सन्तति तथा जातिवाद की पनपती विष-वल्लरी पर कुठाराघात है। छज्जूराम शास्त्री का 'परशुराम-दिग्विजयम्' बहुत कुछ अर्थों में आधुनिकता का एक आयाम है।

परम्परा में शोधन, पुनरुत्थान अथवा पुनर्मूल्याङ्कन—पुनरुत्थान अतीत को वर्तमान में उतार लाना चाहता है। उसी में कुछ सुधार कर वर्तमान के सन्दर्भ में उसकी प्रासङ्गिकता जताने के लिये उसे व्यवहार्य रूप देना चाहता है। आगे देखने की बजाय, सीधे खड़े मेंढक की तरह पीछे की ओर देखता है। हम कौन थे ? क्या हो गए ? से सबक लेता है। महात्मा गान्धी विषयक 'भारत-पारिजातम्', 'पारिजाता-

पहारः', 'पारिजातसौरभम्', 'सत्याग्रह-गीता' और 'गान्धिगौरवम्' का कथ्य, सत्य और अहिंसा का पुनरुत्थानवादी राजनैतिक रुख है। अखिलानन्द शर्मा और मेधाव्रत के "दयानन्ददिग्विजयम्" परम्परा में शोधन और पुनरुत्थान के साथ-साथ पुनर्मूल्याङ्कन की प्रवृत्ति को, सुधारवादिता और इतिवृत्तता के परिप्रेक्ष्य में पनपने में अग्रसर हैं। "नेहरु यशः सौरभम्" में बलभद्रप्रसाद गोस्वामी ने त्रिसूत्र का पुनर्मूल्याङ्कन कर उस त्रिसूत्र रूप यज्ञोपवीत की वर्तमान में प्रासङ्गिकता, उपादेयता को स्पृहणीय रूप में प्रस्तुत किया है।

गिने-चुने लोगों में ही यज्ञोपवीत धारण करना आज एक परम्परा का निर्वाह मात्र रह गया है। उद्देश्य शायद ही किसी को ज्ञात हो फिर क्रियात्मक रूपता का प्रश्न ही क्या ? या देश-विभाजन के समय हुए नर-संहार के कारण पाकिस्तान से आए हुए बन्धुओं को हिन्दुत्व का सूचक-त्रिसूत्र-व्यवहार्य हो गया था। आज जब पुरातन ऋणत्रय बीती बात बनकर रह गये हैं, तब नेहरु जैसे भावी जन नायक को हिन्दुत्व मात्र तक सीमित चिह्न क्योंकर स्वीकार्य होता—पर यज्ञोपवीत संस्कार में बालक नेहरू ने—जन्म-भूमि, जनजीवन तथा भारतीय जाति के समुद्धार की प्रतिज्ञा का प्रतीक त्रिधा-निबद्ध नवयज्ञ सूत्र-यज्ञोपवीत–सहर्ष धारण किया।

स्वजन्मभूमेर्जन जीवनस्य, जातेः समुद्धार कृत प्रतीकम्।
दधार संस्कार महोत्सवेऽसौ त्रिधा निबद्धं नव यज्ञसूत्रम्॥

अखिलानन्द शर्मा ने १० = २४, १० = २७ में श्राद्ध की युगानुकुल व्याख्या देकर आज के युग में श्राद्ध-विधि के प्रति ललक पैदा की। सांस्कृतिक-चिन्तकों के चरितों पर आधारित समस्त महाकाव्य शोधन, पुनरुत्थान और पुनर् मूल्याङ्कन प्रवृत्ति के पोषक बन कर आए हैं।

नारी स्वतन्त्र बनती अस्मिता—

आधुनिक संस्कृत के महाकाव्यों में नारी अपनी अस्मिता बनाने में सफल रही है। सीता, सावित्री, रुक्मिणी जैसे प्रमुख पात्र अपने अस्तित्व के प्रति सजग हैं। वे किसी की हाथ की कठपुतली बने रहना पसन्द नहीं करतीं। "कुछ सत्ता है नारी की" कभी नहीं भूल पातीं। नारियों को स्त्री होने के कारण संसार भर शङ्का की दृष्टि से देखता और बदनामी करता है, करे, पर लोकनायक के विवेक का दीपक तो उनके लिए नहीं बुझता।

आर्य ! यद्यपि मनस्विजनः स्त्रीति विश्ववचनीयतास्पदम्।
लोकनायक विवेक दीपकस्तत्कृते न परिहीयते परम्॥

दूसरे वश्यमानस महात्माओं को परतः प्रमाण नहीं हुआ करता।

आर्य ! यद्यपि शुचित्वमात्मनः सेद्धुमर्हति न साक्षिणं विना।
किन्तु वश्यमनसां महात्मनां वर्त्मगे न परतः प्रमाणिता॥

दूसरी ओर ऊर्मिला जैसी उपेक्षिताओं को, कैकेयी जैसी लाञ्छिताओं की बीसवीं शताब्दी के महाकाव्यों में अपनी कहने का ही नहीं, अपितु समाज की विरोध के लिए विरोधिता का प्रतिरोध करने का और स्वत्व को छीनने के लिए बढ़े हाथ को रोकने और आवश्यकता पड़ने पर काटने, अस्तित्व नकारने वाले मालिन्य को मेटने तथा कुर्सी के लिये किये गये राजनैतिक वाक्छल को नंगा करने का पूरा-पूरा अवसर दिया है। ऊर्मिला में व्यष्टि की सत्ता के लिये अकुलाहट है, छटपटाहट है पर ध्वंस कहीं नहीं, सर्वत्र विवेकिता का साम्राज्य है "मानव व्यक्तित्व को उपेक्षित, निरर्थक, नगण्य सिद्ध करने वाली, किसी दैवी-शक्ति या राजनैतिक सत्ता के आगे न झुकने वाला, मनुष्य की अन्तरङ्ग वृत्ति के प्रति आस्थावान्, प्रत्येक व्यक्ति के स्वाभिमान के प्रतिसजग, दृढ एवं संगठित अन्तःकरण संयुक्त सक्रिय किन्तु अपीडक, सत्यनिष्ठ तथा विवेकशील" व्यक्तित्व झलकता है और थोपी हुई व्यवस्था से मुक्ति का मन्त्र काम्य हो चला है।

वैयक्तिकता और सामाजिकता का समन्वय (व्यक्तित्ववाद पर चोट)—व्यष्टि और समष्टि के बीच भेद की दीवारें टूट रहीं हैं। व्यष्टि समष्टि की ओर उन्मुख है। जिन्हें समाज नीच कहता है पर वे भी तो हैं प्राणी, भले ही उनके पास सवर्णों जैसी न हो वाणी। इसी लघुता को आज काव्य में स्थान मिलने लगा है। लघुत्व उभर रहा है, सामूहिकत्व पनप रहा है, इसका एक परिणाम तो यह सामने है कि व्यष्टि समष्टि एक साथ मिलकर सामूहिक नेतृत्व के—नायक विहीन काव्य—अपनी सत्ता बनाने लगे हैं और पुरानी लीक से हटे-हटे से लगने लगे हैं। 'जनविजयम्' महाकाव्य इस दृष्टि से उत्तम उदाहरण है। व्यक्ति प्रधान नेतृत्व की अपेक्षा सामूहिक नेतृत्व की ओर झुकाव का एक कारण यह भी है कि व्यक्ति प्रधान नेतृत्व अधिनायकत्व की ओर झुकने लगता है, व्यक्ति-पूजा को बढ़ावा देता है जिससे बाद में नेतृत्व संभालने वाले उत्तराधिकारी कुछ अपरिपक्व रह जाते हैं तथा सकार की जगह नकार की राजनीति उभरने लगती है। 'जनविजयम्' के कवि ने सामूहिक नेतृत्व को सराहा है वहीं सामूहिकत्व में उभरते—घटकवाद को आड़े हाथों लिया है। आज के कवि का जितना मन की छान-बीन पर ध्यान है, तन की आवश्यकता का भी उसकी दृष्टि में उतना ही मान है। निरी आध्यात्मिकता से उसे कोई लगाव नहीं, पर शान्तनु सम, तन्वङ्गी, लचीली, नशीली मत्स्यगन्धा के समान भौतिकता के पीछे अन्धा नहीं। मध्यम-मार्ग पर चलता हुआ बेलेन्स को बिगाड़े बिना आज का महाकाव्य कदम-कदम आगे बढ़ रहा है।

सुरक्षा हेतु सामूहिकत्व का सम्पर्क आज अपरिहार्य हो गया है। अलग रहकर व्यक्ति टकराव और संघर्ष को तो बचा जायेगा पर उसका स्वयं 'स्व' कहीं खो सा जायेगा या कुछ नहीं रह जायेगा। अतः व्यष्टि और समष्टि की समन्वयवादी दृष्टि मधुपर्क सम उभय पक्षों के लिये कल्याण की सम्भावनाओं को लिये हुये हैं।

यथार्थ के प्रति ललक—

गली, कूचे, गाँव, बाजार, राजनीति आदि सभी जगह से शब्द चुनता हुआ, तरह-तरह के शब्दों के लिबास में रहता हुआ भी आज का कवि कभी-कभी निर्वसन होने में सहज सुख का अनुभव करता है। अनेक प्रकार के आदर्शों से हटकर दुनियादारी के बन्धनों में बंधी अपनी वाणी को, अन्तश्चेतना को, निर्वसन–नंगा–देखना चाहता है जिससे उसे मन ही मन अनिर्वचनीय सा सन्तोष-सुख मिलता है। 'जनविजयम्' महाकाव्य अभिव्यक्ति और कथ्य की दृष्टि से यथार्थ के नतोन्नत धरातल पर टिका है। प्रासादों की रंगीन सन्ध्याओं में कवि घूम आया है, रईसों के चोचलों को कवि देख आया है तो शान्त-कुटीरों में कवि रह आया है। सफल नेतृत्व के साथ व्यग्र मस्तिष्क और मानस शुचि शुभ नेताओं की कथनी और करनी के अन्तर को कवि ने देखा है, परखा है, सहा है। जीवन के हरे-भरे उद्यानों के निकट अयाचित भयावह गर्त भी झांके हैं, जीवन के उजले पक्ष तथा राजनीति के गन्दे और अन्धेरे गलियारों और—

निन्दा-घृणा-संशय-भीति-लोभ-प्रवञ्चना-स्वार्थ हठ प्रयोगा।
कुचक्र-चक्र-स्खलन-प्रमाता-गतोत्पथा कुत्सित राजनीति ॥[७]

का जो रूप, जैसा देखा है, अनुभव किया है उसे नंगे रूप में खुलकर कहा है।

आज के इतिहास का यह—

उत्पादनं यः कुरुते, न सैव भोक्तुं कदाचिल्लभते किमेतत्।
अन्य श्रमेणर्जित-पुञ्जिकां यो विनियोज्य शेते, सहिभोगमेति ॥
मृदिष्टिका-प्रस्तर-लोह-खण्डैः संघृष्य देहं नव वास्तुरूपम्।
निर्मान्ति येते श्रमिका वराकाः पदं न दातुं प्रभवन्ति तत्र ॥

शरीर-हृद्-बुद्धि-समष्टि निष्ठ श्रमस्य ददाति कोऽत्र।
दत्तेन तेनोदर पूर्ति रेव प्रच्छादनं वा वपुषोऽपि तु स्यात्॥[८]

कटु सत्य रहा हैं। एक ओर अपार धनराशि, जहाँ वानानुकूलित अतिथि-गेहों (गेस्ट हाऊसों) में सुरा और सुन्दरी में डुबकी खाये हुये रईस, इत्र फुलेलों पर पानी सा द्रव्य बहाते हैं, वहीं दूसरी और झुग्गी झोंपड़ी में माँ की हड्डी से चिपक-चिपक जाड़े की रात बितायी जाती है, ऐसा वैषम्य क्यों? यदि धन का समभाग-विभाजन हो जाये तो राष्ट्र में मची भ्रष्टाचार की जय-जय, भाई भतीजेवाद की दुन्दभि और आपाधापी की आई-आई स्वयं शान्त हो जाये।

अपारमेषां द्रविणं दरिद्रता दुनोति तेषां हृदय दिवानिशम्।
मनुष्यता नो मनुजेषु भिद्यते तथापि वैषम्यमिदं कुतस्तनम्॥
जनेषु कस्मान्न विभज्यते समं समानरूपेण समीहितं वसु।
न कस्य चिद् यत्सहजं समीक्ष्यते न कोऽपि तत्राधिकृतो विशेषभाक्॥[९]

आज जग पीडित है अधिक सुख से, और पीड़ित अधिक दुःख से। जब तक सम-भाग न होगा धन का, तब तक वैषम्य कभी भी कम न होगा। ऐसे ही पुरुष अनेक व्याह रचा ले, एक की चिता ठण्डी न हो, दूसरी को अंकशायिनी बना ले, पर वैधव्य की मारी नारी मन से भी पर पुरुष का स्पर्श न करे और मेंहदी रचे हाथ वैधव्य का असह्य दुःख झलते रहे [रुक्मिणीहरणम् ११=८६, ९०] कवि को पुरुष की इस व्यवस्था पर झुंझलाहट है पर निराशा नहीं, तार्किक चेतना है, यथार्थ के प्रति एक आग्रह है, जो आधुनिक होने के स्वयं में आयाम हैं।

प्रश्नाकुलता—प्रश्न जिज्ञासा-भाव को जगाता है, तो सन्देह मन को उद्वेलित कर ज्ञान-क्षेत्र में अग्रसर करता है। इसीलिए—"उदयतामत्र लता द्रुमोऽथवा" [सीताचरितम् २.३५] में स्वयं से प्रश्न करते-करते सीताचरितम् के राम निश्चय बुद्धि हो प्राणसमा सीता-लता को छोड़ने को उद्यत हो गये और सीता का प्रश्नवाचक सुझाव नेतृत्व का मुँह बन्द करने तथा कुर्सी की रक्षा के हित कितनी ही कलियों के कुचल जाने को बुरा न मानने वालों को खुला चेलेञ्ज है। "जनविजयम्" का कवि जनता के पीड़िकों से, आश्वासन-दान-दक्षों से प्रश्नों की झड़ी लगा देता है—

कियच्चिरं वेत्स्यथ मूढक मां? कियच्चिरं लुण्थ मे मतानि।
भाग्येन खेला कियच्चिरं मे? कियच्चिरं ब्रूत विशेषणं च॥[१०]

प्रश्नों की बौछार करते-करते आज की प्रमुख समस्या नारी अपहरण और बलात्कार को उठाकर व्यग्र मानस शुचि शुभ्र वेशों से कवि पूछ वठता है—

कियच्चिरं राजपथेऽबलानां शठैरभीतैः क्रियतेऽभिमर्शः।
कथं बलात्कार हृती च तासां न वा विधतो बत रोम कूपम्॥[११]

समाचार पत्रों में रोज उछलती खबरों, राष्ट्र की कलङ्कभूत ज्वलन्त समस्या दहेज की मांग पूरी न होने के कारण रोज-रोज मरने वाली अनागिन ललनाओं की ओर से कान में तेल डालकर सोयी हुई सरकार से कवि पूछता है—

कियच्चिरं यौतुक लुब्धकैः हा! बध्वा बधः ताडनदाहने च।
कियच्चिरं लोकमनः प्रतीतिः कन्यापितृत्वं खलु नाम कष्टम्॥[१२]

दूसरे के धन पर, चरित्र पर, वचन पर सन्देह-दृष्टि रखना मानव समाज की एक प्रवृत्ति है पर उसी सन्देह-दृष्टि प्रवृत्ति का सन्धान जब सन्देह-दृष्टि व्यक्ति पर किया जाता है, तब वह सन्देह-दृष्टि

व्यक्ति अकुला उठता है, तड़प उठता है। अपनी छोटी सी पुष्टि के लिये बड़े से बड़े चरित्र पर लाञ्छन लगाना उसके लिये सामान्य सी बात है। 'सीताचरितम्' का कथ्य ही सामान्य से जन की सन्देह-दृष्टि और अपने पक्ष की पुष्टि का परिणाम है।

राष्ट्रिय-चेतना—रागात्मक, विचारात्मक और क्रियात्मक त्रिविध राष्ट्रिय-चेतना की प्रवृत्ति का उच्चतम निखार संस्कृत महाकाव्यों में अपने सौम्य रूप में चरम शिखर पर है। सांस्कृतिक-चिन्तकों के स्वर में भूखण्ड एवं उसकी प्राकृतिक सुषमा और सांस्कृतिक-गरिमा, जाति, धर्म, इतिहास, परम्परा भाषा और साहित्य आदि के प्रति रागात्मिका वृत्ति, राजनैतिक विचारधारा एवं आर्थिक नीतिमयी जीवन-दृष्टि युक्त विचारात्मक वृत्ति अपने यौवन पर है, वहाँ विवेकानन्द, गाँधी, नेहरू, लालबहादुर शास्त्री और इन्दिरा जैसे व्यक्तित्वों के रागात्मक, विचारात्मक एव क्रियात्मक राष्ट्रिय चेतना के स्वर का सूर्य—"क्रियात्मकं जीवनमेव मङ्गलम्" मध्य आकाश तक स्वतन्त्र विचरण करता हुआ देश-विदेश की सीमाओं को आलोकित करता नजर आता है।

कहीं भारत के अतीत गौरव का ज्ञान है, तो कहीं भारत की प्राकृतिक सुषमा और सांस्कृतिक गरिमा में अनजान क्षितिजों को रमा लेने वाला सहारा है। 'स्वराज्यविजयम्' 'दयानन्ददिग्विजयम्' 'रामानन्ददिग्विजयः' आदि महाकाव्यों में ये रूप खूब निखरे हैं। 'विवेकानन्दचरितम्' 'सत्याग्रहगीता' और शङ्करजीवनाख्यानम्' में देशीपन, सामयिक-विचार और कुछ कर गुजरने की अहिंसात्मक क्षमता का उभरता चित्र है।

"चरित्र गीतिर्नवराष्ट्रचेतना प्रसूतिः" यथातथ्य क्रियात्मक राष्ट्र नायकों के चरित्रों के गायन से राष्ट्रिय-चेतना में नया मोड़ आ गया है। चरित्रों का गान करते-करते गायक स्वयं अनजाने चरित-नायक के पद-चिह्नों का अनुगामी हो जाता है, जिससे गायकों की दृष्टि भी राष्ट्रियता के संकुचित (तंग) दायरों को तोड़ विश्वबन्धुत्वमयी अन्ता राष्ट्रियता की ओर बढ़ने लगती है। 'नेहरू यशः सौरभम्" 'नेहरू चरितम्' 'इन्दिरागाँधी चरितम्' राष्ट्रिय-चेतना के क्रियात्मक रूप हैं।

गाँधी विषयक महाकाव्यों में किसी से न टकराते हुये जन मानस में विश्व बन्धुत्व की चाह पैदा करने की ललक है। त्र्यम्बक शर्मा भण्डारकर, श्रीधर भास्कर वर्णेकर, डॉ० सत्यव्रतं, द्विजेन्द्रनाथ शास्त्री, डॉ० परमानन्द शर्मा, वलभद्र प्रसाद गोस्वामी, क्षमाराव, ब्रह्मानन्द शुक्ल, भगवदाचार्य, रेवा प्रसाद द्विवेदी, पं० लक्ष्मी नारायण शर्मा, मेधाव्रत प्रभृति के महाकाव्यों में राष्ट्रिय-चेतना का स्वर काव्यों के आरम्भ से लेकर अन्त तक तीव्र से तीव्रतर होता चला है। त्र्यम्बक शर्मा–भण्डारकर का आह्वान गीत हर युवक को आगे बढ़ने के लिये कदम मिलाकर एक साथ चलने के लिये खुला निमन्त्रण है। ब्रह्मानन्द शुक्ल की राष्ट्रिय-चेतना अन्तर्राष्ट्रिय चेतना की विश्वधारा से जा मिली है। अर्थ नीतियों पर काव्यात्मक शैली में डॉ० सत्यव्रत और डॉ० परमानन्द के महाकाव्यों में चित्रण स्पष्ट है और प्रजातन्त्र में प्रजा—स्व—तन्त्र के अधिपत्य के जमाव का निःशुल्क प्रदर्शन है। 'चीरहरणम्' राष्ट्र के समक्ष मुँह खोले खड़ी नारी समस्या और 'कौन्तेयम्' अवैध सन्तति और जातिवाद की समस्या को उठाये हुये राष्ट्रिय-चेतना को झकझोर रहा है।

आधुनिक संस्कृत महाकाव्यों का प्राचीन महाकाव्यों की प्रवृत्तियों से भिन्न पथ है जैसे सामयिक घटना क्रम और देसीपन को लिए राजनैतिक चेतना के प्रति जागरुकता के प्रति संवेदनशील रहना आज के काव्यों का अविभाज्य अंग हो रहा है—जनतन्त्र जनतन्त्र न रहकर जन का ही तन्त्र बनकर रह गया और तन्त्र के जन का शब्द ही विधि (कानून और भाग्य) बन गया तथा वह विधि भी सत्ता बुभुक्षु की सुविधा बनकर रह गया।

सत्ता भोक्तुमिच्छु का वाक्य ही कार्य जगत् में आप्त वाक्य बनकर आ गया।
बूढ़े बड़े माननीयों का मान उसके आगे नतमस्तक सा हो गया या ढह गया॥
निर्मुक्त स्वच्छन्द सत्ता बुभुक्षुका अयाचित तथाकथित शुभ संगम—
मनीषियों को बिना कारा के ही कारा सा बनकर रह गया॥
शब्दो विधिर्विधिरभूत्सुविधा च तस्य, सर्वत्र चास्य वचनं परमाप्तवाक्यम्।
मानं च वृद्धमहसामपि संचकार, कारायते सुधियाँ शुभ संगमोऽस्य॥[13]

उगते सूर्य को नमस्कार करने की लालसा और पदोन्नति की कामना करने वाले झूठे प्रशंसक अधिकारी भोर होते ही आकर घर के चारों ओर मंडराने लगते क्योंकि न जाने स्वयंभू भगवान् के हित कब, कहाँ, क्या करना पड़ जाय। डरे-डरे से, सहमे सहमे से धन के भूखे भेडियों को अपने इर्द-गिर्द देख स्वयं को युवराज समझने की भूल कौन नहीं कर बैठता—

प्रातर्गृहे तमधिकारिणः सिषेवे, शुश्रूषया स्व च कदा च ननु किं विधेयम्।
आज्ञाकरा उपगता प्रणता सभेयाः तस्या दधुः मनसि किं युवराज भावम्॥[14]

अतीत जीवी न होकर नदी के समान आज का स्मृति रूप भूत और आज के सपने स्वरूप भविष्य की छाया से दूर, जो अपना है, उस वर्तमान में समग्रता से जीना और श्रृङ्गार भावना के ह्रास को दैनन्दिन अधिकाधिक स्थान दिया जाना बढ़ रहा है। श्रृङ्गार-भावना का ह्रास तो एक प्रबल प्रवृत्ति के रूप में उभर रहा है। प्रत्येक महाकाव्यकार मानो आँखों को गङ्गाजल से धोकर लेखनी उठाता है। दूसरे आज का संस्कृत काव्य मनोविनोद मात्र नहीं रह गया है और न किसी को खुश करने के लिए ही रचा जा रहा है। आज काव्य का रुझान एकाङ्गी न रहकर बहुमुखी हो गया है क्योंकि जीवन का लक्ष्य बहुमुखी हो गया है। डेढ़, दो दर्जन महाकाव्यों को उलट-पलट कर देखा परन्तु "रुक्मिणीहरणम्" की संयत श्रृङ्गार-सलिला के अतिरिक्त सर्वत्र श्रृङ्गारिकता मुँह छिपाये मिली।

आ—अभिव्यक्ति की दृष्टि से—

आधुनिक—काल में भावों के साथ रचना-विधान में भी यथाशक्य परिवर्तन हुआ है। वस्तु संगठन, काव्य रूप, भाषा—प्रयोग, बिम्ब—विधान, नूतन उपमान और प्रतीकों पर आधुनिकता की छाप परिलक्षित है पर यह कहीं नहीं कि—नूतनता की झोंक में, उचित अनुचित का विचार किये बिना पुरातन को एकदम बिसरा दिया हो। घटना की जगह, घटना-प्रभाव अथवा व्यक्ति के चरित्र को महत्ता मिलने लगी है। भाषण शैली और आत्म निवेदन शैली में अथवा समाधिस्थ मनसा अपने मन के तीव्र आक्रोश को निकालना, सत्ता पर करारी चोट करना पत्र प्रणाली और सम्प्रेषणीयतामय सन्देश काव्यात्मक अभिव्यक्ति का रूप बन चला है।

सरलीकरण के प्रति पक्षपात, भाषा और साहित्य को कूप-जल से निकाल कर बहता नीर बनाना, जन जनतक प्रचार और प्रसार करना तथा व्याख्या अनपेक्ष्य रचना करना, आधुनिक कवियों को प्रिय हो चला है। लोक-प्रचलित मुहावरों का संस्कृतीकरण कहीं- कहीं तो मूल से भी आगे बढ़ गया है। जैसे दीवान के लिये—धिया मानं यस्य सः=धीमानः, वसूल—वसु=धनं, उना=आदेशेन, कोपेन वा, लीयते=गृह्यते, यत्र तत्=वसूलम्, कुर्सी जैसे शब्दों का नूतनोद् भव, चमचागिरि जैसे जन प्रचलित शब्दों का असल रूप में प्रयोगकर "गान्धिगौरवम्" और "जनविजयम्" आदि महाकाव्यों ने भाषा को समृद्ध से समृद्धतर बनाने में योग दिया है और भाषा को बहता नीर बनाने का सुष्ठु प्रयास किया है। 'नेहरु यशः सौरभम्' में भाषा का प्रशासनिक स्वर है और 'स्वराज्य विजयम्' में सरल भाषा का, प्रयोग है। 'इन्दिरा गान्धी चरितम्' में सीधी, सरल, अप्रसाधित राह की राहगीर प्रयोगवादी भाषा है। 'विवेकानन्दचरितम्' में भाव और भाषा में देशभक्ति का स्वर है, छन्दों का अजायबघर है, देश भक्तों के लिये, आह्वान गीत

के रूप में साफल्य-मोक्ष का खुला द्वार है, युग धर्म—स्वदेश प्रेम का क्रियात्मक प्रचार है और कर्म क्षेत्र भारत के गौरव की रक्षा की सिद्धि का द्वार है। 'जनविजयम्' में हृदय-स्पर्शिता और दो टूक बात करने वाली स्पष्टवादिता है, फिर भी —भाषा सरल और सुबोध होते हुये भी, जीती-जागती समर्थ संस्कृत उभरकर आई है परन्तु नेहरूचरितम् की भाषा, पश्चिमा कृति होने के कारण, प्रसाद गुण सम्पन्न, प्राञ्जल एवं परिष्कृत है। काव्य में इतिहास और कल्पना का मणि-काञ्चन संयोग है अतएव भाषा में लालित्य का आ जाना नितान्त नैसर्गिक है।

अनेक नये उपमानों और प्रतीकों का प्रयोग भी आधुनिक महाकाव्यों में खुलकर हुआ है। षड्यन्त्रकारी विषैले, कुत्सित राजनीतिज्ञों के लिये कुछ सर्प का प्रयोग कितना व्यवहार्य है? पारिजात सौरभम्, पारिजातापहारः, और भारत पारिजातम् (तीनों गान्धीचरित) में भाषण शैली और आत्म-निवेदन शैली पर साधुत्व और संन्यासित्व की छाप एकदम स्पष्ट है और समाधिस्थ मनसा मन की घुटन, कुहासा और आक्रोश के निकालने का ढग—'जनविजयम्' में अपने प्रखर रूप में उजागर है। पत्र और सन्देश शैली का स्वर शिवराज्योदयम्' में मुखर है।

निष्कर्षतः कहा जा सकता है कि संस्कृत के आधुनिक महाकाव्यों में अनेक ऐसी प्रवृत्तियाँ उभर कर समाने आई हैं जिन्हें काल-सापेक्ष और विचार-सापेक्ष दोनों ही दृष्टियों से आधुनिक कहा जा सकता है। जन-सामान्य को अधिक से अधिक महत्त्व देने की बात आज की प्रजातान्त्रिक और समाजवादी जीवन-पद्धतियों के सर्वथा अनुकूल है, जिसका संस्कृत के आधुनिक महाकाव्यों में यथार्थ रूप में चित्रण हुआ है।

'जनविजयम्' 'चीरहरणम्' और 'कौन्तेयम्' प्रभृति कुछ इनी गिनी रचनाओं को छोड़कर इन महाकाव्यों में साहित्य के बदलते प्रतिमानों और आज के ज्ञान-विज्ञान का प्रभाव वैसी द्रुतगति से परिलक्षित नहीं हो रहा है, जिस द्रुत-गति से अन्य आधुनिक भारतीय भाषाओ के—काव्य में तुरत झलक जाता है, शायद इसके पीछे वर्तमान चकाचौंध से दूर रहते हुए अपनी साधु-वृत्ति के सहारे चलने की प्रवृत्ति संस्कृतज्ञों की मनस्थिति में विशेष परिवर्तन नहीं होने दे पा रही हों अथवा आगा-पीछा देखते हुये बहाव में व्यर्थ उखड़ने की अपेक्षा कुछ ठहराव की प्रवृत्ति काम कर रही हो वर्तमान में बदलते प्रतिमा को बौने, वांस का नहन्ना से अधिक न मानने का 'अहम्' आड़े आ रहा हो और यह भी सम्भव है कि साधन और सुविधा की कमी में अपरिचय की मजबूरी, बदलते प्रतिमानों को पचाने, पनपाने में दूरी बनाये हुये हो।

सन्दर्भ-संकेत—

१. डॉ० श्रीधर भास्कर वर्णेकर, शिवराज्योदयम्, सर्ग ५ श्लोक सं० ३८.
२- रेवाप्रसाद द्विवेदी सीता चरितम् ।२।२६। ३. वही २—२७ ।
४. सीताचरितम्—२-३५ ।। ५. वही ३—८ ।। ६.—४-५७ ।
७. जनविजयम्—७—१६ । ८. जनविजयम्—१.७१, ७२, ७३ ।
९. रुक्मिणीहरणम्—११=८७, ८८ । १०. जनविजयम्—१५—४ ।
११. जनविजयम्—१५-१३ । १२. जनविजयम्—१५-१४ ।
१३. जनविजयम् ८-४३।। १४. जनविजयम् ८-४४ ।

———

अध्यक्ष-संस्कृत विभाग
देवनागरी कालिज
गुलावठी, बुलन्दशहर।

□ डॉ० सुभाषो वेदालङ्कारः

राजस्थान-प्रदेशे नवीनं संस्कृत-साहित्यम्

आदिकवेर्वाल्मीकेरारभ्य संस्कृत-साहित्य-निर्माणस्य या परम्परा चिरात् प्रवर्तिता आ अद्यावधि चापि सततं प्रवर्तते समस्तेऽपि भारतवर्षे। मध्यकाले तावत् साहित्य-मन्दाकिनी मन्दप्रवाहाजायत न चासौ विच्छिन्ना। आंग्लशासनेऽपिप्रभूतं संस्कृत-साहित्यमलेखि विद्वत्तल्लजैः कविवरेण्यैश्च। शतशः रचनाः प्रकाशमुपगताः नैकाश्च विलुप्ताः।

स्वतन्त्रभारते नवीन-संस्कृत-साहित्य-सर्जने महती प्रवृत्तिः परिलक्ष्यते। राजस्थान-प्रदेशोऽपि तत्र पृष्ठगामी नास्ति। समभूवन्नत्रापि बहवः कविपुङ्गवाः कोविदप्रवराश्च यैः स्वलेखनीभिः सुललितानि कमनीयानि काव्यानि विलिखितानि।

संस्कृत-साहित्य-निर्माणप्रसङ्गे दृश्यश्रव्यभेदयोः सर्वविधासु सर्वासु च शैलीषु गुम्फितानि गद्य-काव्यानि, पद्यकाव्यानि, नाटकानि कथाश्च विबुधकुलदिनकराणां विविध-शास्त्रपारङ्गतानां पंडितानां कवन कलां वैदुष्यञ्च प्रदर्शयामासुः। गीतिकाव्यानि, मुक्तककाव्यानि, नवीनशैल्याः संस्कृतकविताः, संस्कृत गीतानि, गज्जलिकाश्च सर्वतः सम्मानं लभन्ते।

नवसाहित्यप्रचारे प्रसारे च लग्नाः संस्कृत-कल्याणी, संस्कृत-भारती, संस्कृत-रत्नाकरः, स्वर-मङ्गलाः प्रभृतयः पत्रिका अपि सततं प्रकाशमुपगताः।

प्रातः स्मरणीया सर्वविद्यानिधयः भट्टमथुरानाथशास्त्रिणः, राजस्थानस्य कविषु प्रधानं स्थानं दधति। तैः खलु नैककृतिषु नैकशैलीषु अभिनवसंस्कृतसाहित्यस्य परम्परा प्रचालिता। संस्कृत-छन्दोभिः सह हिन्दी-भाषायाः सोरठ-दोहा—घनाक्षरीप्रभृतीनां छन्दसामपि प्रचुरप्रयोगस्तैरकारि। तेषु च संस्कृत-छन्दस्सु, सततं सुरुचिपूर्णं साहित्यं तेषां कल्पनया प्रसूतम्। नैतावदेव अपितु संस्कृत-वाङ्मये नूतनकाव्य सरणि-निर्माणे उर्दूभाषाया अपि छन्दांसि तैरङ्गीकृतानि। उर्दू-गज्जलिकायाः स्वरे सरण्याञ्च शतशः पद्यानि कविताश्च तेऽलिखन्। राजस्थाने संस्कृत-गीति-प्रवर्तका अपि त एव सन्ति।

'जयपुर-वैभवम्' नाम्ना विख्यातं तेषां सरसं काव्यं जयपुरगौरवं तदितिवृत्तञ्च प्रस्तौति। 'गोविन्द वैभवं', नाम गीतिकाव्यं गीता-प्रेस-गोरखपुरेण प्रकाशितं, यत्र कविः नैकरूपेषु कृष्णस्तुतिञ्चकार। कृष्णस्य रूपमाधुर्यं, वेणुवादनम्, भवसागरतारणसामर्थ्यं, प्रभृति विषयेषु कवेः कविता विलासो दर्शनीयो ननु। अस्मिन् काव्ये बहुशः व्रजभाषाछन्दांसि प्रयुक्तानि, घनाक्षरी-छन्दसि श्रीकृष्णस्वरूपमेवं चित्रितं खलु—

यमुना वरचारी विपिनविहारी सुरसुखकारी दृशममताम्।
वृन्दावनवासी वेणुविलासी सुकृतविकासी संन्नमताम्॥

मङ्गलाचरणं सोरठाछन्दसि विराजते—

मन्दीभवदरविन्दमिन्दीवर-वन्दीकृतम्।
वन्देमहि गोविन्द-चरण मन्दीकृतम्॥

'उद्यान-वीथ्याम्' गलतातीर्थस्य वर्णनं रम्ये सवैय्याछन्दसि कवेः नैपुण्यं प्रकटयति—

परितो गिरिराजिरुदञ्चयते परितोषमिमं मरुता चलता ।
नवनीपसमिद्धसुगन्धवशाऽध्यवनी बहुभाति विरूढलता ॥
अयि मञ्जुलनाथ विभाति मनाक् सरसीकृतसीकरशीतलता ।
गिरिगह्वर गोमुखतो गलतां सलिले सुखं कुरुते गलता ॥

गद्य-साहित्यप्रसङ्गे "आदर्श-रमणी" इत्याख्य उपन्यासः प्रशंसनीयो ननु । श्रीमतां भट्टमहोदयानां लेखनव्यसनमासीत्, अतः शतशो विषयेषु तेषां कथाः, निबन्धाः, यात्रावृत्तानि, विविध-गोष्ठी-वस्तु-वृत्तानि च मञ्जुलभाषायां प्रकाशितानि ।

कोविदवर्मा सूर्यनारायण-शास्त्रिणः "श्रीकृष्णदूतम्" नामकं दूतकाव्यं विलिख्य "उद्योग-लहरी" इति काव्यं चक्रुः । उद्योग-महिमानं प्रदर्शयन् कविः भणति, काव्यरचनापि उद्योगं विना न संभवति । तथा च--

अनेक-प्राग्जन्मार्जित-विविध-पुण्योर्जितया
महाशक्त्या तद्वत् सुकविकृत-सत्काव्यपठनात् ।
अमन्दायोगाद्वा विविध-रुचि-लोकानुभवतः
विरच्यं सत्काव्यं भवति किमु नोद्योगविषयः ॥

को नाम जनिमान् पुमान्न वेद स्वनामधन्यानां जयपुरस्थ-महाराज-संस्कृत-महाविद्यलयस्य भूतपूर्वाचार्याणां श्रीमतां गिरिधरशर्माचतुर्वेदि महाभागनां नाम कीर्तिञ्च । सर्वशास्त्रपारङ्गतेन तेन महा-विदुषा गद्य-पद्य-रथाः नैकरचनाः संस्कृतवाचिगुम्फिताः । तस्य "पुराण-परिजातः" 'प्रमेय-परिजातश्च' चेति कृतिद्वयं सर्वत्र विश्रुतम् । 'गिरिधर-सप्तशती' रुचिरा-प्रसादमयी च गाथा रचना वरीवर्ति । विद्या-सम्पन्नो ननुः गर्वशून्यो भवेदित्युपदिशन् कविः लिलेख यत्—

बहुविद्यागुणगणजो गर्वो धार्मो न सज्जनैः किञ्चित् ।
बहुविद्यागुणमण्डितविद्वद्भिर्नहि वसुन्धरा शून्या ॥

बीकानेर वास्तव्यानाँ विद्वत्प्रवराणां विद्याधरशास्त्रिणां प्रसादगुणालङ्कृता, सरला, सरसा हृद्या सशक्ता शैली तु कस्य न वन्द्या । तेन पंडितकविना "हरनामामृतम्" "विश्वमानवीयम्" चेति महा-काव्यद्वयी कृता । "शिव-स्तुतिः', 'सूर्य-स्तुतिः', 'लीलालहरी' 'विद्याधरनीतिरत्नम्' 'मतिलहरी', आनन्द-मन्दाकिनी, 'विचार लहरी' चेत्यादीनि लघुकाव्यानि लिखितानि । कवेः शैल्याः रुचिकरं मञ्जुलरूपं सर्वत्र प्रस्फुरं प्रतिभाति । हरनामामृतकाव्ये मरुभूमिवर्णने कविः ब्रूते—

ते तुन्दिलाः स्वादुरसाः कलिङ्गाः सा शारदी चञ्चलचन्द्रिका च ।
स्फूर्ति स्फुरन्ती स्फुरगावलीषु क्रमेलकानां गतयश्च तास्ताः ॥
प्रशंसितोऽयं चरकेश्वरेण शरीरविज्ञानविचक्षणेन ।
स्नेहार्द्रभावैकरत्नैर्विशिष्टः शुष्कोऽपिनित्यं सरसः सदेथः ॥
न निन्दनीयो न च शङ्कनीयः मरुप्रदेशोऽकरभूमिरेव ।
यः पांसुलोऽपि प्रयतैश्चरित्रैरपांसुलानां धुरिकीर्तनीयः ॥

कवेः शैलीविलासः दर्शनीयो नन्वत्र—

चिन्तितं साधयेद् धीमान् उद्यमैः कार्यसाधकैः ।
यत् भाव्यं तद् भवत्येव तत्र चिन्ता तु कीदृशी ॥

विद्वत्तल्लजस्यास्य पद्येषु विश्वबन्धुत्वभावनासमलङ्कृतानि पद्यानि गीतानि द्रष्टव्यानि भवन्ति—

न को देशः स्वदेशो नो बान्धवा न च के भवे ।
मर्त्या एव वयं सर्वे मातास्माकञ्च भूरियम् ।।
अपरं मन्यसे त्वं न परः स परः सखा ।
प्रेमार्द्रा यदि दृष्टिस्ते सर्वं प्रेममयं जगत् ।।

जयपुरनगरवास्तव्यः श्रीहरिशास्त्रि,-महोदयो नैककाव्यैः रचनाभिश्च जनहृदयाह्लादनं विबुधजन रञ्जनञ्च चकार । भक्ति प्रधानकाव्यलेखकेषु तस्य विशिष्टं स्थान खलु । भक्तिरचनासु'' 'ललिता-सहस्र-काव्यम्'' 'सिद्धिस्तवः' चेति प्रसिद्धे स्तः । प्रथमकृतौ भावत्याः त्रिपुर-सुन्दर्याः विभिन्नरूपाणां रम्यं वर्णनं कुर्वता कविना तत्स्तुतिराचरिता । कवेः तान्त्रिकशक्तेः कवित्वशक्तेश्च चमत्कारः पदे पदे दृष्टिपथं समामाति । प्रथमपद्ये लक्ष्मीं वर्णयन् कवि र्ब्रवीति—

लक्ष्मीः या प्रकटी चकार कलया कल्पादि कालेऽम्बिका ।
स्थित्यै चास्यजगमाामस्य कृपया प्रारात् स्वयं विष्णवे ।।
विश्वोद्भावनकारिणीमपि च यां सर्वाः श्रमन्ति श्रियः ।
श्रीमाता ललिताम्बिका भगवती साऽऽस्तां मम श्रेयसे ।।

नैके निबन्धाः शतशः पद्यानि च विविधविषयेषु प्रकाशं गतानि विदुषोऽस्य । कवेः कवितासु भारत गौरव-द्योतकं स्तवनमपि वरीवर्ति । देशभक्तेः भावनां नैकत्र प्रकटी भवति—यथा च

जय जय भारतदेश,
शुभ्रहिमाद्रिसुभगमस्तकवत् ।
हिन्दमहासागर कलकल वत्,
तव सुयशस्या विजयपताका ।
स्फुरति सदा हे शुभतीर्थेशा ।। जय जय—

शास्त्रिमहोदयेन 'आदर्श-जीवनम्' नाम महाकाव्यमपि विनिर्मितम् यत्र प्रसाद गुणोऽङ्गी कृतः तद्यथा—

निहन्ति पापं प्रददाति शान्तिं सत्वं समुदभावयतेऽन्तरा च ।
निरस्य दुष्कर्म तनोति शर्म, सतां पवित्रं चरितं सुतीर्थम् ।।

कवि-लहरी उदर प्रशस्तिः' चेति द्वे रचने चापि विख्याते ननु ।

श्रीमनः रामचन्द्रशास्त्रिणः बहवो निबन्धाः पद्यानि च पत्रपत्रिकानां शोभामवर्धमन् । ''श्री हरिभक्तचरितम्'' नाम काव्यमपि प्रसिद्धं तन्नाम्ना । यत्र स्वामिहरिभक्तस्य जीवनचरित्रम् वर्णितंमुसु किल । गुरुमहिमा तत्र दृष्टव्योऽस्ति—

ससार-भोगाद्विरतं प्रशान्तं गोपालसेवानिरतं नितान्तम् ।
श्रीसन्त्रराजं सतत जपन्तं वन्दे गुरुं श्रीहरिभक्तदेवम् ।।

श्रीमता काशिनाथचन्द्रमौलिमहाभागेन अभिनवकाव्यकृतिभः संस्कृतसाहित्यं संवर्धितम् । गजलछन्दसः नूतनरूपेण प्रस्तुतीकरणे तस्य नैपुण्यं प्रशंसनीयं ननु । दिङमात्रं पद्यमेकं विलोकनीयम्—

ज्ञातः केन त्वदीयो भेदः पारोलब्धः किं भवदीयः ।
मग्नाः सर्वे गुणबन्धेषु भवत्पूजा यं सुस्थानमिदं मनोमन्दिरेषु ।।

तस्य रचनासु "शिवार्जुनीयम्" 'शङ्करदिग्विजयम्' 'राजाम्बरीशम्' 'सत्याग्रहः', "संस्कृत-गीताञ्जलिः" इति प्रसिद्धाः सन्ति।

बुधवरः विश्वनाथः नाटके स्वप्रतिभां दर्शितवान्। "वामन-विजयम्", 'कलिकौतुक" ञ्चेति नाटक द्वयमसौ लिलेख। प्रथम तावत् दशदृश्येषु विभक्तं द्वितीयञ्च नवदृश्येषु। वामनविजये भारतगौरवगानं कुर्वन् कविः भणति—

बङ्गैः सगीतकीर्तिः कलितकलकश्चोत्कलैरान्ध्रबन्धुः।
मद्रैरुन्निद्रमुद्रो जवजनितजयोद्गुर्जरः सिन्धुबिन्दुः॥
पञ्चापरैरञ्चितश्रीमधुमधुरो मध्यमुक्तैर्बिहारैः।
आर्यावर्ताऽभिधानो जयतु जनपरो मानिनां जन्मभूमिः॥

'कविसम्मेलनं' नाम प्रहसनमपि कविरलिखत् पद्यमेकं विलोच्यताम्—

कदा बीकानेरेऽति विमलघड़सी सर तटे।
द्विचकुस्थान् छात्रान् भ्रमणनिरतान् कन्दुकरतान्॥
'कहूँगा' भोः छात्रा उपविशत "ट्रांजिस्टर सुनो"।
कुरुध्वं तत्पश्चात् 'सब मिल' जले कूर्दनकलाम्॥

कोविदशिरोमणयो महामहोपाध्यायाः श्रीमन्तो नवल किशोरकांकराः भारतवर्षे सम्प्रति लब्धयशसो विद्यन्ते। गद्य-पद्य-युक्ताः नैकक्कृतयस्तेषां ख्यातिङ्गताः। "यात्राविलास" नाम गद्यकाव्यं तेषांमद्भुतकवित्वं पाण्डित्यञ्च प्रस्फुटितं करोति। तेषां नैकपुस्तकानि पुरस्कृतानि। अद्यत्वे तैः रचितः 'राष्ट्रवेदो" नाम वेदग्रन्थः सर्वत्र चर्चाविषयो वरीवर्ति। वैदिक-छन्दोभिः लिखितीऽसौ प्रथमो मानवकृतो वेदो वर्वति। स च श्रीमतां कांकराणां वेदेषु गतिं वैदुष्यञ्च प्रस्तोति। स चायं वेदोऽस्मिन् वर्षे पुरस्कृत उत्तरप्रदेशसर्वकारेण

डूंगरपुरनिवासी श्रीमान् गणेशरामः शर्मा राजस्थानस्य सुप्रसिद्धः कथाकारः निबन्धकारश्च वरिवर्ति। तस्य च विदुषः शतशो लेखा निबन्धाश्च संस्कृत-पत्रिकासु प्रकाशिताः।

राजगुरुः गोपीनाथः शास्त्री 'काशी-लहरी' नाम्नीं स्वभावोक्त्यलङ्कारालङ्कातां कृतिञ्चकार। राजस्थानप्रान्ते व्यंग्य-प्रधानानि काव्यान्यपि विनिर्मितानि। अस्मिन् प्रसङ्गे त्रिवेदिनः श्रीदीनानाथशास्त्रिणः नामोल्लेखयोग्य आस्ते। तस्य "परीक्षा-पञ्चदशी" प्रशंसनीया नाम। परीक्षामहिमानं वर्णयन् कविरुवाच—

यस्मिन् युगे देवि, विभो परीक्षे! नूनं त्रिलोकी त्वमनुप्रविष्टा।
विमुच्य मातर्भवतीं शरण्यां ब्रूहि व्रजेयं शरणं कमद्य॥
मातः परीक्षे तव वीक्ष्य कालं चित्रं न यद् बिभ्यति देवि शिष्याः।
इन्द्रादिदेवा बलशालिनोऽपि मुह्यन्ति भीता नितरां विचित्रम्॥
दीनोऽहीनोऽप्यथवा दरिद्रो जनः कथङ्कारमपि स्वदैवात्।
चेदीश्वरि! त्वत् कृपयावलीढः प्राप्नोति लोकं सुपदं स एव॥

अस्यामेव श्रेण्यां कलानाथशास्त्रिणः रचना "केनाणकम्" चापि प्रशंसार्हं ननु।

विद्यानिधिः पट्टाभिरामशास्त्री वाल्मीकिरामायणमाश्रित्य बालानां बोधाय "रामायण-संग्रहः" नामकं ग्रन्थमकरोत् ।

साहृश्य तत्त्व के आधार पर काव्य चारुत्व से युक्त होकर चमत्कृत हो उठता है। उपमालंकार हो अथवा रूपक, दीपक, उत्प्रेक्षा और अतिशयोक्ति अलंकार, सभी में चारुत्व का मूल साहृश्य ही रहता है, यह साहृश्य चाहे वर्णगत हो अथवा पदगत या वस्तुगत। अनुप्रासादि में वर्णगत साहृश्य, यमक, श्लेष (शब्द-श्लेष) आदि में पदगत साहृश्य, उपमा, रूपक, उत्प्रेक्षा आदि अलंकारो में वस्तुगत साहृश्य होता है। यह वस्तुगत साहृश्य भी कहीं वाच्य रूप से रहता है और कहीं गम्य रूप से। वाच्य साहृश्य भी कभी भेद प्रधान होता है और कभी अभेद प्रधान साहृश्य आरोपमूलक और अध्यवसाय भेद से दो प्रकार का माना जाता है। पुनः अध्यवसाय साहृश्य में कभी अध्यवसाय व्यापार की प्रधानता होती है और कभी अध्यवसित व्यापार की। इसके अतिरिक्त साहृश्य पदार्थगत और वाक्यार्थगत भेद से भी दो प्रकार का हो जाता है। इसप्रकार साहृश्य कई प्रकार का है। साहृश्य में वैशिष्ट्य के कारण ही विभिन्न अलंकारों का चारुत्व-विशेष की अनुभूति होती है।

साहृश्य का मूल तत्त्व साधारणधर्म है। साधारणधर्म का निर्देश तीन रूपों में किया जा सकता है—(१) अनुगामी रूप में, (२) वस्तु प्रति वस्तुभाव रूप में तथा (३) बिम्ब-प्रतिबिम्बभाव रूप में। जब साधारणधर्म उपमेय तथा उपमान में एक रूप में रहता है, तो उसे अनुगामी कहते हैं। जब वह एक होने पर भी विभिन्न वाक्यों में विभिन्न शब्दों द्वारा निर्दिष्ट होता है, तब उसे वस्तु-प्रतिवस्तुभाव के रूप में निर्दिष्ट माना जाता है। जिस समय उपमेय वाक्य और उपमान वाक्य में धर्म भिन्न-भिन्न होते हैं और उन धर्मों में ही साहृश्य का कथन होता है, तो उसे बिम्ब-प्रतिबिम्ब-भाव कहा जाता है। इसप्रकार साहृश्य और साधारण धर्म के भेदों के आधार पर साहृश्य मूलक अलकार अनेक प्रकार के हो जाते हैं। उदाहरणार्थ उपमा, उपमेयोपमा, अनन्वय और स्मरण में उपमेय और उपमान में भेद या अभेद प्रधान साहृश्य का कथन नहीं होता है, अपितु भेदाभेदतुल्यप्रधान साहृश्य रहा करता है।

रूपक, परिणाम, संदेह, भ्रान्तिमान्, उल्लेख, अपह्नुति, उत्प्रेक्षा और अतिशयोक्ति इन आठ अलंकारों में अभेद प्रधान साहृश्य की प्रधानता रहा करती है। पुनः इनमें से रूपक, परिणाम, संदेह, भ्रांतिमान्, उल्लेख और अपह्नुति इन छः अलंकारों में उपमेय पर उपमान का आरोप किया जाता है, अतः इनमें आरोपमूलक साहृश्य की सत्ता रहती है और उत्प्रेक्षा तथा अतिशयोक्ति में उपमेय पर उपमान का अध्यवसाय किया जाता है, अतः इनमें अध्यवसायमूलक साहृश्य का प्राधान्य रहता है।

तुल्ययोगिता, दीपक, प्रतिवस्तुपमा, दृष्टान्त, निदर्शना, व्यतिरेक, सहोक्ति, विनोक्ति, समासोक्ति, परिकर, श्लेष, अप्रस्तुतप्रशंसा, अर्थान्तरन्यास, पर्यायोक्ति, व्याजस्तुति, आक्षेप अर्थालंकारों में उपमेय

और उपमानगत सादृश्य शब्दत: कथित नहीं होता, अपितु गम्यमान रूप में रहता है। इन अलंकारों में से तुल्ययोगिता और दीपक अलंकारों में स्थित उपमेय और उपमान (दोनों) में विद्यमान सादृश्य का कथन एक वाक्य में किया जाता है एवं वह सादृश्य वाक्य में विद्यमान अथवा वाक्यगत अनेक पदों में रहता है। अत: ये अलंकार पदार्थगत गम्यसादृश्यमूलक वर्ग में समाहित किये जाते हैं। इसके विपरीत प्रतिवस्तूपमा, दृष्टान्त और निदर्शना अर्थालंकारों में दो वाक्यों की योजना की जाती है तथा सादृश्य वाक्य के अर्थ में निहित रहता है । परिणामत: इन अलंकारों में वाक्यार्थगत सादृश्य माना जाता है। प्रतिवस्तूपमा, दृष्टान्त और निदर्शना इन तीनों अलंकारों में भी वस्तु-प्रतिवस्तुभाव रूप से साधारण-धर्म का निर्देश होने पर प्रतिवस्तूपमा अलंकार और बिम्ब-प्रतिबिम्बभाव रूप से निर्देश होने पर दृष्टान्त तथा निदर्शना अलंकार होते हैं।

व्यतिरेक, सहोक्ति और विनोक्ति अलंकारगत उपमेय और उपमान में भेद प्रधान गम्यमान सादृश्य रहता है। समासोक्ति और परिकर अलंकारों में भी सादृश्य गम्यमान रूप में रहता है, किन्तु उनमें उसकी प्रतीति विशेषण के वैचित्र्य के कारण होती है। इसीप्रकार श्लेष (अर्थ-श्लेष), अप्रस्तुतप्रशंसा, अर्थान्तरन्यास, पर्यायोक्ति, व्याजस्तुति और आक्षेप अलंकारों में गम्यमान सादृश्य की प्रतीति में विशेषण और विशेष्यगत वैचित्र्य रहा करता है।

सादृश्यमूलक अलंकारों का सर्वप्रथम वाच्यसादृश्यप्रधान और गम्यसादृश्यप्रधान के रूप में वर्गीकरण करके पुनः उनको विभिन्न वर्गों में इसप्रकार वर्गीकृत किया जा सकता है—

(क) वाच्यसादृश्यप्रधान—भेदाभेदतुल्यप्रधान—(१) उपमा (२) उपमेयोपमा (३) अनन्वय (४) स्मरण।

अभेदप्रधान—(अ) आरोपमूलक—(१) रूपक (२) परिणाम (३) संदेह (४) भ्रांतिमान् (५) उल्लेख और (६) अपह्नुति।

(ब) अध्यवसायमूलक—(१) उत्प्रेक्षा (२) अतिशयोक्ति।

(ख) गम्यसादृश्यप्रधान—(अ) पदार्थगतगम्यसादृश्यमूलक—(१) तुल्ययोगिता (२) दीपक।

(ब) वाक्यार्थगतगम्यसादृश्यमूलक—(१) प्रतिवस्तूपमा (२) दृष्टान्त (३) निदर्शना।

(स) भेदप्रधानगम्यसादृश्यमूलक—(१) व्यतिरेक (२) सहोक्ति और विनोक्ति।

(४) विशेषणवैचित्र्यगम्यसादृश्यमूलक—(१) समासोक्ति और (२) परिकर।

(५) विशेषणविशेष्यवैचित्र्यगम्यसादृश्यमूलक—(१) श्लेष (२) अप्रस्तुतप्रशंसा (३) अर्थान्तरन्यास (४) पर्यायोक्ति (५) व्याजस्तुति और (६) आक्षेप।

वाक्य अर्थ-प्रतीति की दृष्टि से स्वयं में एक इकाई होते हुए भी शब्द, शब्दार्थ तथा शब्दावयव—स्वर या व्यञ्जन आदि अंगों में विभक्त होता है। अर्थ से लेकर इन शब्दावयवों अर्थात् वर्णों तक यदि हम प्रत्येक का पृथक्-पृथक् रूप से अथवा मिश्र (सम्मिलित) रूप से साम्य देखना चाहें, तो विदित होगा कि इस अंगभेद के आधार पर भी सादृश्य अनेक प्रकार का हो जाता है। इसके अतिरिक्त वाक्यों की रचना, संघटना आदि की दृष्टि से भी यदि सादृश्य का परिगणन किया जाए, तो वह अनेक प्रकार का सिद्ध होता है। अलंकारसर्वस्य के रचयिता आचार्य रुय्यक ने इसी सादृश्य को पौनरुक्त्य नाम देकर उसके शब्दपौनरुक्त्य, अर्थपौनरुक्त्य, स्वर-पौनरुक्त्य, व्यञ्जन-पौनरुक्त्य और स्वर-व्यञ्जन-पौनरुक्त्य भेद करते हुए उसे अनेक अलंकारों का मूल माना है।[१]

अनुप्रास क्या है, केवल कुछ ध्वनियों का समान होना ही तो है।[४] इसीप्रकार यमक भी स्वर और व्यञ्जन समुदाय की पुनरुक्ति मात्र ही तो है।[५] पुनरुक्तवदाभास अलंकार का वैचित्र्य क्या है, केवल वही समानता, जिसे पूर्व कहा जा चुका हो।[६] आरभटी, कैशिकी आदि वृत्तियों में जो चारुत्व है, क्या वह समान कोमल वर्णों का या समान परुष वर्णों का प्रयोग नहीं है।[७] माधुर्य और ओज आदि गुण क्या हैं, अक्लिष्ट (मृदु) और क्लिष्ट वर्णों से युक्त समान प्रयोग ही तो है।[८]

इसप्रकार यह कहा जा सकता है कि काव्य में सौंदर्य या आह्लादकता के हेतु के रूप में स्वीकार किये गये अनेक तत्त्व इसी सादृश्य पर आधारित हैं। अनुप्रास, यमक, लाटानुप्रास और पुनरुक्तवदाभास अलंकारों के मूल में ध्वनि-सादृश्य और उपमा, रूपक आदि अर्थालंकारों के मूल में अर्थसादृश्य को देखा जा सकता है।

भाषा के वैचित्र्य का अधिकांश भाग केवल साम्य पर आधारित है। काव्य में सौंदर्याधायक तत्त्वों के अनुसंधान के प्रसंग में सर्वप्रथम इसी साम्यमूलक सौन्दर्य को ही स्वीकार किया गया है। अर्थ में प्राप्त होने वाले इसी साम्य के प्रकार-भेद को लेकर उपमा, रूपक, उत्प्रेक्षा, अतिशयोक्ति आदि विविध अलंकारों का प्रादुर्भाव हुआ है। अप्पयदीक्षित ने इसी तथ्य को प्रमाणित करने के लिये केवल मुख और चन्द्र को आधार बनाकर बाईस अलंकारों को समझने की चेष्टा की है। तद्यथा—

'चन्द्र की तरह मुख' इस कथन में चन्द्र और मुख में सौन्दर्य और माधुर्य का जो सादृश्य है, उसका वर्णन होने के कारण उपमालंकार हुआ। 'चन्द्र की तरह मुख' इसी भाव को व्यक्त करने के लिये विचित्र वचनभगिमा-भेद के कारण उपमा के स्थान पर अन्यान्य अनेक प्रकार के अलंकारों की उत्पत्ति होती है। यथा 'चन्द्र की तरह मुख है', 'मुख की तरह चन्द्र है,', ऐसा वाक्य-प्रयोग होने पर पूर्व वाक्य का उपमान (चन्द्र) और उपमेय (मुख) दूसरे वाक्य में विपरीत भाव से वर्णित होने के कारण उपमेयोपमा हुई। 'मुख मुख की तरह है,' ऐसा कहने पर एक ही वस्तु में उपमानत्व और उपमेयत्व दोनों धर्मों के पर्यवसान के कारण अनन्वय अलंकार हुआ। यदि यह कहा जाए कि 'मुख की तरह चन्द्र है' तो प्रसिद्ध उपमान चन्द्र का उपमेय (मुख) रूप में निर्देश करने के कारण प्रतीप अलंकार हुआ। 'मुख ही चन्द्र है,' ऐसा कहने पर उपमान और उपमेय के अभेदत्व के कारण रूपक अलंकार होगा। 'मुख-चन्द्र के द्वारा ताप का उपशमन होता है,' ऐसा कहने पर परिणाम अलंकार हुआ। 'यह मुख है या चन्द्र है', यहाँ संदेह अलंकार है। 'चन्द्र समझकर चकोरगण तुम्हारे मुख की ओर आकृष्ट होते हैं,' यहाँ भ्रान्तिमान् अलंकार है। 'चकोर चन्द्र समझकर एवं मधुकर कमल समझकर तुम्हारे मुख के प्रति अनुरक्त होते हैं,' यहाँ उल्लेख अलंकार हुआ। 'यह चन्द्र है, मुख नहीं' में अपह्नुति अलंकार है। 'मुख मानों चन्द्र है' यहाँ उत्प्रेक्षालंकार हुआ। 'यह रहा चन्द्र'—यहाँ उपमेय का उल्लेख न करके उपमान का ही उपमेय के रूप में निर्देश करने के कारण अतिशयोक्ति अलंकार हुआ। 'मुख द्वारा चन्द्र और कमल दोनों ही विजित हुए'—यहाँ तुल्ययोगिता अलंकार है। 'रात्रि में चन्द्र और तुम्हारा मुख दोनों हर्षित होते हैं,' यहाँ दीपक अलंकार है।[९] तुम्हारा मुख है, यह समझकर मैं आनन्दित होता हूँ और चन्द्र है, यह समझकर चकोर आनन्दित होता है, यहाँ प्रतिवस्तूपमा अलंकार है। आकाश में चन्द्र, पृथ्वी पर तुम्हारा मुख यहाँ दृष्टान्त अलंकार है। मुख-चन्द्र श्री धारण करता है, यहाँ निदर्शना अलंकार है। निष्कलंक मुख चन्द्र से भी बढ़ गया है, यहाँ व्यतिरेक अलंकार है। तुम्हारे मुख के साथ-साथ चन्द्र रात्रि में हर्षित होता है, यहाँ सहोक्ति अलंकार है। नेत्रांकरुचिर मुख स्मित-ज्योत्स्ना से उपशोभित है, यहाँ चन्द्र ही मुख है, चन्द्र के अन्तर्गत कृष्ण चिह्न समूह मानों नेत्रांक है, ज्योत्स्ना स्मित की छटा है। इस प्रतीति के कारण यहाँ समासोक्ति

अलंकार हुआ । 'अब्जेन सदृशं वक्त्रं हरिणाहितशक्तिना वाक्य में 'अब्ज' शब्द का अर्थ 'अब्भ्यो जातः' इस व्युत्पत्ति के अनुसार चन्द्र भी किया जा सकता है और कमल भी किया जा सकता है। 'हरिणाहित-शक्तिना' शब्द का अन्तद हरिण + आहित + शक्तिना अथवा 'हरिणा + आहित + शक्तिना' दोनों प्रकार से किया जा सकता है। इसलिए यहाँ श्लेष अलंकार हुआ। मुख के सामने चन्द्र निष्प्रभ है, यहाँ अप्रस्तुत-प्रशंसा अलंकार है।[10]

इसप्रकार हम देखते हैं कि अप्पयदीक्षित ने मुख एवं चन्द्र का अवलम्बन कर बाईस अलंकारों के दृष्टान्त दिये हैं। इन बाईस अलंकारों के मूल में विद्यमान सादृश्य के अन्दर, जो केवल मुख और चन्द्र के पारस्परिक सादृश्य पर आधारित है, किसी प्रकार का संदेह नहीं किया जा सकता। इसीलिये अप्पयदीक्षित ने इन पूर्वोक्त बाईस अलंकारों को उपमा का विवर्त मात्र कहा है। इसप्रकार यह स्वीकार किया जा सकता है कि यह सादृश्य ही चाहे वर्णगत हो या पदगत या वस्तुगत, अधिकांश अलंकारों के मूल में स्फुट अथवा अस्फुट रूप में रहा करता है।

उपर्युक्त विवरण के आधार पर कहा जा सकता है कि सादृश्य प्रतीति की अवस्था में जिस अलंकार की अभिव्यक्ति होती है, वह उपमा है; 'चन्द्र इव मुखम्' इसका उदाहरण है। इस अवस्था में उपमेय तथा उपमान के कतिपय तत्त्वों में ऐक्य और कतिपय में अनैक्य प्रतीत होता है, अतः यह भेदाभेदप्रतीति की अवस्था होती है। उपमालकार की सादृश्य प्रतीति उत्तरोत्तर बढ़ते-बढ़ते तादूप्यप्रतीति तक पहुँचती है, इसे अभेद प्रधान आरोप की अवस्था कहते हैं, क्योंकि इसमें आरोप विषय पर आरोप्य-माण का आरोप किया जाता है। सादृश्यप्रतीति में तो कुछ अवयवों में भिन्नता बनी रहती है, परन्तु तादूप्यप्रतीति में वह सर्वथा लुप्त हो जाती है। उपमेय तथा उपमान सर्वथा समान हो जाते हैं। इस अवस्था में रूपकालंकार की अभिव्यक्ति होती है। 'मुखमेव चन्द्रः' इसका उदाहरण है। यहाँ मुख चन्द्र के समान ही नहीं अपितु अभेदारोप के कारण तदाकार बन गया है। इस अवस्था में यद्यपि अवयवों (धर्मों) की भेद-प्रतीति लुप्त हो जाती है किन्तु अवयवियों (धर्मियों) की भेद-प्रतीति बनी रहती है। यद्यपि मुख का चन्द्र से तादूप्य स्थापित हो जाता है, परन्तु दोनों की सत्ता पृथक्-पृथक् बनी रहती है। यदि समानता केवल अभेद-प्रतीति में ही न रहकर व्यवहार में भी आ जाए, तो उस स्थिति में परिणाम अलंकार की अभिव्यक्ति होती है। 'मुखचन्द्रेण तापः शाम्यति' इसका उदाहरण है। इसमें रूप समारोप के साथ-साथ व्यवहार-समारोप भी किया गया है।

उपमा रूपक आदि अलंकारों में मुख की सत्ता चन्द्र में विलीन नहीं होती। अतः सादृश्य की प्रक्रिया और आगे बढ़ती है तथा उपमेय (धर्मी, अवयवी) का निगरण प्रारम्भ होता है। उपमेय की इस निगरण प्रक्रिया में उत्प्रेक्षालंकार की अभिव्यक्ति होती है। इस अवस्था को अध्यवसाय की साध्यावस्था कहा जाता है। इस अवस्था में विषय का निगरण होकर विषय तथा विषयी की सर्वथा अभेद प्रतिपत्ति नहीं होती, अपितु इस अभेद प्रतिपत्ति की ओर हमारी मानसिक प्रक्रिया उन्मुख हो जाती है। 'नूनं मुखं चन्द्रः' अथवा 'मुख चन्द्रः मन्ये' के द्वारा इसकी अभिव्यक्ति होती है। इसमें मुख तथा चन्द्र की पृथक् सत्ता बनी रहती है। निगरण की यह प्रक्रिया उपमेय के निगीर्ण होने पर तथा उपमान का अध्यवसाय होने पर समाप्त हो जाती है। उत्प्रेक्षा में जो अध्यवसाय साध्य था, वह अब सिद्ध हो जाता है। इस अवस्था में व्यापार की प्रधानता न होकर अध्यवसित उपमान की प्रधानता हो जाती है, व्यापार तो सर्वथा समाप्त हो जाता है। इस अवस्था में अभिव्यक्त अलंकार अतिशयोक्ति कहलाता है। 'अयं चन्द्रः' इस उदाहरण में मुख की सत्ता चन्द्र में विलीन हो गई है और एक चन्द्र ही अवशिष्ट रह गया है।

इसप्रकार यहाँ मुख की प्रतीति का ही नहीं, उसके स्वरूप का भी निगरण हो गया है। उत्प्रेक्षा अलंकार में तो प्रतीति-निगरण होता है, जबकि अतिशयोक्ति में स्वरूप-निगरण हो जाता है।

इसप्रकार जो सादृश्य-विधान मुख तथा चन्द्र के सादृश्य से आरम्भ हुआ था, वह उनके सादृश्य-प्रतीति, तादृप्य-प्रतीति तथा मुख के निगरण की प्रक्रिया में से होता हुआ उनके सर्वथा ऐक्य में समाप्त हो जाता है और केवल 'चन्द्र' अवशिष्ट रह जाता है। कवि की कल्पना-बुद्धि सादृश्यमूलक तादृप्य; निगरण-प्रक्रिया आदि विभिन्न अवस्थाओं में से होती हुई ऐक्य तक पहुँच जाती है। इन भिन्न-भिन्न अवस्थाओं में भिन्न-भिन्न अलंकारों की अभिव्यक्ति होती है। यथा सादृश्य-प्रतीति की स्थिति में उपमा, उपमेयोपमा तथा अनन्वय की, तादृप्यावस्था (अभेदारोपावस्था) में रूपक, परिणाम, उल्लेख एवं अपह्नुति की निगरण-प्रक्रिया की अवस्था में उत्प्रेक्षा की तथा ऐक्यावस्था में अतिशयोक्ति की। इसप्रकार स्पष्ट है कि अधिकांश अलंकारों के मूल में सादृश्य निहित रहता है।

निष्कर्ष यह है कि वस्तु की सम्यक् अभिव्यक्ति के लिये कवि जब सादृश्य विधान करता है, तब उसका कल्पनाजन्य सादृश्यज्ञान भिन्न-भिन्न रूप धारण करता है और उसी के अनुसार भिन्न-भिन्न अलकारों की अभिव्यक्ति होती है। सादृश्यविधान एक माध्यम है, जो पाठक को या श्रोता को कवि की मनोभूमि तक पहुँचाता है। सादृश्य एक ऐसा तत्त्व है, जिसके कारण वर्ण्यविषय चारुत्व से युक्त होकर चमत्कृत हो उठता है। सादृश्य चाहे स्फुट हो या अस्फुट, वाच्य हो या व्यंग्य, वहचारुत्व का हेतु अवश्य होता है। हाँ, इतना अवश्य है कि वाच्य सादृश्य की अपेक्षा व्यंग्य सादृश्य चारुतर प्रतीत होता है। सम्भवतः इसीलिये आचार्य महिमभट्ट ने उपमा आदि अलंकारों की अपेक्षा रूपक आदि अलंकारों को अधिक श्रेष्ठ स्वीकार किया है।[११]

संदर्भ संकेत

१. द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजायते।
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति ।। ऋग्वेद १।१६४।२० ।।
अथर्ववेद ६।६।२६, श्वेताश्वतरोपनिषद् ४।६, मुण्डकोपनिषद् ३।१।१

२. उतत्वः पश्यन्नददर्श वाचम्, उतत्व श्रृण्वन्नश्रृणोत्येनाम्।
उतोत्वस्मै तन्वं विसस्रे, जायेव पत्यै उषती सुवासा ।। ऋग्वेद १०।७१।४ ।।

३. (क) इहार्थपौनरुक्तयं शब्दपौनरुक्तयं शब्दार्थपौनरुक्तयं चेति त्रयः पौनरुक्तयप्रकाराः—
अलंकार सर्वस्व पृ० २३

(ख)··· अर्थपौनरुक्त्यादेवार्थाश्रितत्वादर्थालंकारत्वंज्ञेयम्। वही पृ० २५

(ग) शब्दपौनरुक्त्यं व्यञ्नमात्रपौनरुत्क्यं स्वरव्यञ्जनसमुदायपौनरुक्तयं च। वही, पृ० २८

४. (क) सरूपवर्णविन्यासमनुप्रासं प्रचक्षते। भामह काव्यालंकार १।५
(ख) वर्ण साम्यमनुप्रासः। काव्यप्रकाश, नवम उल्लास पृ० ४०४

५. स्वरण्यञ्जनसमुदायपौनरुक्त्यं यमकम्। अलंकार सर्वस्व, सूत्र ६, पृ० ३३

६. पुनरुक्तवदाभासमभिन्तवस्त्विवोद्भासिरूपपदम्। काव्यालंकारसारसंग्रह, पृ० २

७. (क)········· । अंगंः सहास्य निर्हास्यैरेभिरेवात्र कैशिकी ।। दशरूपक २।५२
(ख)·········आरभटीपुनः। मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादि चेष्टितैः ।। वही २।५६

८. (क) चित्तद्रवीभामयो हलादोमाधुर्यमुच्यते। संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्
—साहित्यदर्पण ८।२

मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः । वही ८।३
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा । वही ८।४
(ख) ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।। वही ८।४
वीरवीभत्सरौद्रेषु क्रमेणाधिकमस्य तु । वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।।
उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह । शकारश्च षकारश्च तस्य व्यञ्जकतां गता ।। —वही ८।५–६

९. चन्द्र इव मुखमिति सादृश्यवर्णनं तावदुपमा । सैवोक्तिभङ्गीभेदेनानेकालंकारभावं भजते । तथाहि— 'चन्द्र इव मुखं मुखमिव चन्द्रः इत्युपमेयोपमा । मुखं मुखमिव इत्यनन्वयः । 'मुखमिव चन्द्रः' इति प्रतीपम् । चन्द्रं दृष्टवा मुखं स्मरामि इति स्मरणम । मुखमेवचन्द्रः इति रूपकम् । मुखचन्द्रेण तापः शाम्यति इति परिणामः । किमिदं मुखमुताहो चन्द्रः इति संदेहः । चन्द्र इति चकोरस्त्वन्मुखमनुधावन्ति इति भ्रातिमान् । चन्द्र इति चकोराः कमलमिति चञ्चरीकास्त्वन्मुखे रज्यन्ति इत्युल्लेखः । चन्द्रोऽयं न मुखम्' इत्यपह्नवः । नूनं चन्द्रः इत्युत्प्रेक्षा । चन्द्रोऽयम् इत्यतिशयोक्तिः । मुखेन चन्द्रकमले निर्जिते इति तुल्ययोगिता । निशि चन्द्रस्त्वन्मुखं च हृष्यति इति दीपकम् ।

—चित्रमीमांसा पृ० ४२, संस्करण १९६५ ।

१०. त्वन्मुखं एवाहं रज्यामि चन्द्र एव चकोरो रज्यते इति प्रतिवस्तूपमा । दिवि चन्द्रो भुवि त्वन्मुखम् इति दृष्टान्तः । मुखं चन्द्रश्रियं विभर्ति इति निदर्शना । निष्कलंकं मुखं चन्द्रादतिरिच्यते इति व्यतिरेकः । त्वन्मुखेन समं चन्द्रो निशासु दृष्यति इति सहोक्तिः । मुखं नेत्रांकरुचिरं स्मितज्योत्स्नोपशोभितम् इति समासोक्तिः । अब्जेन सदृशं वक्त्रं हरिणाहितशक्तिना इति श्लेषः । मुखस्य पुरतश्चन्द्रो निष्प्रभः इत्यप्रस्तुतप्रशंसा । एवमुक्तानेकालंकारविवर्तवतीयमुपमा । —चित्रमीमांसा पृ० ४३, संस्करण १९६५ ।

११. वाच्यात्प्रतीयमानोऽर्थस्तद्विदां स्वदतेऽधिकम् ।
रूपकादिरतः श्रेयानलंकारेषु नोपमा ।। व्यक्तिविवेक २/३९

———

प्रवक्ता, संस्कृत विभाग
एस० डी० कालिज
मुजफ्फरनगर

□ डॉ० विष्णुदत्त राकेश

अलंकार और काव्य-भाषा

साधारण व्यवहार की भाषा से काव्य-भाषा में अन्तर होता है। कवि विषय और अभिव्यक्ति की दृष्टि से वस्तु के मूर्तीकरण में सहज व्यक्त उपादानों में परिवर्तन करता है तथा वास्तविक रोज मर्रा की अभिव्यक्ति को जन्म देता है। इस अन्यथाकृत अभिव्यक्ति में शब्द नई अर्थ भूमि को प्रकाशित करने लगते हैं जो संदर्भ विशेष के दबाव से भावपरम्परा को उद्बुद्ध करते हैं। कोश संकेतित अर्थ के अतिरिक्त अपेक्षाकृत अधिक से अधिक अर्थ प्रकाशित करने के उद्देश्य से कवि चेष्टापूर्वक शब्दार्थ-योजना को नई दिशा में मोड़ता है। गद्यबन्ध की अपेक्षा काव्यबन्ध शब्द विन्यास परम्परित ढाँचे से हटकर प्रस्तुत किया जाता है। अतः काव्यशास्त्री इस ढाँचे को विचलन की संज्ञा देने लगे हैं। कुप्पू स्वामी जैसे भारतीय विचारक इसे 'टर्न ऑफ एक्सप्रेशन' या अभिव्यक्ति की वक्रता कहते हैं जो अलङ्कार की मूल चेतना है। इससे स्पष्ट होता है कि काव्य-भाषा सामान्य भाषिक अभिव्यक्ति तथा व्याकरणिक साँचे में ढली हुई दैनन्दिन प्रयोग की भाषा से हटी हुई, सोद्देश्य मोड़ी हुई अभिव्यक्ति है। व्याकरणिक दृष्टि से इस विचलन को सदोष माना जा सकता है पर काव्यात्मक दृष्टि से इसे भाषिक सर्जना की अपूर्व क्षमता कहा जा सकता है। कविता में शब्द-योजना या भाषा इकाइयों का बिखराव भी अर्थ सहभाव की दृष्टि से संगत होता है क्योंकि अन्वात्मिका बुद्धि समग्र के प्रत्यक्षीकरण सिद्धान्त के आधार पर भाव परम्परागत बोध को उस बिखराव में भी अन्वित कर देती है। अतः कविता के परस्पर सम्बद्ध अर्थ का ग्रहण अन्वय से होता है। अन्वय का प्रयोजन भाषिक इकाइयों का सगत तथा सदर्भानुकूल चयन ही नहीं है अपितु छन्दानुरोध, लयसृष्टि तथा प्रभावसिद्धि के लिये सम्बद्ध अर्थ का बोध भी है जो वस्तु के याथातथ्य चित्रण की अपेक्षा वास्तविक से अतिरिक्त गुण वाले रसात्मक चित्रण का परिणाम है।

विशेष प्रयोजन युक्त होने से काव्य-भाषा असाधारण प्रयोग ग्रथित होती है। इन असाधारण भाषिक प्रयोगों से भाषा की संवर्द्धित शक्ति का बोध होता है। अलङ्कार भाव विशेष की भाषिक अभिव्यक्ति के अन्यथाकृत प्रयोग हैं जो रूपक आदि के मध्यम से समग्र काव्य-सर्जना को घेरे रहते हैं। लक्षणात्मक प्रयोगों का बाहुल्य संस्कृत, फारसी, अंग्रेजी, हिन्दी काव्य में मिलता है जो अलंकृत चेतना की अनिवार्य शर्त है। आचार्य रामचन्द्र शुक्ल तथा आचार्य विश्वनाथ प्रसाद मिश्र ने अलङ्कारों को वर्णन-प्रणाली तथा भावाभिव्यंजन शैली कहा है। डॉ० भगीरथ मिश्र जी अलङ्कार को साधारण कथन न मान कर चमत्कार पूर्ण उक्ति मानते हैं। अलङ्कार कथन की ललित भंगिमा हैं, जिस उक्ति में कोई बाँकपन मिलता है वहीं उक्ति अलङ्कार है। उक्ति वैचित्र्य के अनेक रूप हो सकते हैं वे ही विभिन्न अलङ्कार हैं। डॉ नगेन्द्र ने भी अलङ्कार को उसके सीमित अर्थ में उक्ति चमत्कार ही माना है और आई० ए० रिचर्ड्स भी प्रैक्टिकल क्रिटिसिज्म में रूपक या मेटाफर के व्याज से समग्र काव्याभिव्यक्ति की मूल चेतना को स्पष्ट करते हैं। इसका तात्पर्य इतना ही है कि अलङ्कार का सम्बन्ध शब्द और अर्थ से ही है काव्य के प्रतिपाद्य से नहीं। कुन्तक ने कहा भी है—

'उभौ द्वावप्येतौ शब्दार्थावलंकार्यावलंकरणीयौ केनापि शोभातिशयकारिणालंकारेण योजनीयौ।'

काव्य-भाषा भी वक्र शब्द और अर्थ का विन्यास है। वक्रशब्देतर शब्दार्थ काव्येतर भाषिक अभिव्यक्ति के साधन है। अतः काव्य-भाषा का अनिवार्य गुण शब्दार्थ की वक्रता अथवा अलंकृत चेतना

है। सम्पूर्ण अभिव्यक्ति के लिये उसकी पर्याप्त अर्थ बोधकता के लिये ही अलङ्कार शब्द में अलम् पद का प्रयोग किया गया है। उसकी पर्याप्ता इस अर्थ में भी है कि अलङ्कार जन्य चमत्कार उसी रूप और मात्रा में इतर भाषा में पुनः प्रस्तुत नहीं किया जा सकता। डॉ० सियाराम तिवारी ने 'साहित्यशास्त्र और काव्य-भाषा' में यहीं धारणा व्यक्त की है। भोज ने तो वक्रत्व को ही अलङ्कार कहा है, अवक्र शब्दार्थ तो वचन या वार्ता मात्र हैं—

वक्रत्वं च अलङ्कारत्वम्—अवक्रयोः शब्दार्थयोः वचनमात्रत्वात्।

रुद्रट के टीकाकार नमिसाधु 'अर्थ प्रकारास्तावन्तोऽलङ्काराः' कहकर कथनशैली को अलङ्कार कहते हैं। आनन्दवर्धन भी 'अनन्ता हि वाग्विकल्पास्तत्प्रकारा एव चालङ्काराः' कहकर कथन की अनन्त भंगिमाओं को अलङ्कार बताते हैं, उनका आशय भी यही है कि काव्याभिव्यक्ति के मूल में अलङ्कृत चेतना रहती है तथा काव्य-भाषा के विधान के रूप में अलङ्कारों का अध्ययन किया जाना चाहिये।

भाषिक विश्लेषण का अर्थ होता है, वर्ण, पद, वाक्य और प्रबन्ध का अध्ययन। ध्वनि, वक्रोक्ति वादी आचार्यों ने इन की अपने ढग से विवेचना की है। अलङ्कारवादी वर्ण सौन्दर्य का विवेचन करते हुये अनुप्रास, यमक तथा चित्र का स्वरूप निर्धारण करते हैं। पद सौन्दर्य का विश्लेषण श्लेष, पुनरुक्ति, परिकर, परिकरांकुर तथा वक्रोक्ति के विवेचन में करते हैं। उत्प्रेक्षा, दृष्टान्त, निदर्शना प्रतिवस्तूपमा, असंगति, उल्लेख, दीपक, अर्थान्तरन्यास का विवेचन करते हुये वाक्यगत प्रयोगों की चर्चा होती है तथा प्रबन्ध अलङ्कृति में एक-एक वाक्य समग्र घटना की सूचना देने वाला सिद्ध हो जाता है। वर्ण, पद, वाक्याश्रित अलङ्कारों को समानार्थी पदों के विन्यास मात्र से चमत्कारी नहीं बनाया जा सकता। उचित शब्द प्रयोग की अनिवार्यता पर एफ० एल० लुकास, रैनवेलेक तथा रावर्टमिलर जैसे पाश्चात्य विचारकों ने भी बड़ा बल दिया है। उदाहरण के लिए कुमारसंभव का एक श्लोकार्ध लें—

द्वयं गतं सम्प्रति शोचनीयतां
समागम प्रार्थनया कपालिनः।

यहाँ आभिजात्य की प्रतीक पार्वती का वनवासी शिव के साथ समागम अशोभनीय बताना कवि का उद्देश्य है। पार्वती लोकनेत्र कौमुदी है और शिव कपाली, अमंगलवेशधारी, शिव का समागम कुत्सा-जनक होगा, इस बेमेल परिणय की व्यञ्जना के लिये कपाली शब्द का प्रयोग कवि ने किया है। छन्दानुरोध और समान अर्थ बोध की दृष्टि से यदि कपाली का समानार्थी पिनाकी शब्द यहाँ रख दिया जाय तो व्याकरणिक दृष्टि से कोई अन्तर नहीं होगा पर काव्य-भाषा की दृष्टि से कपाली शब्द में जो सौन्दर्य है वह शौर्य व्यजक पिनाकी शब्द में नहीं। अतः स्पष्ट कहा जायगा कि यहाँ सौन्दर्य अर्थगत न होकर रूप गत ही है। श्लेष का सौन्दर्य भी पदगत ही होता है, यहाँ श्लिष्ट पद के समानार्थी पद को रख देने से चमत्कार समाप्त हो जाता है। विहारी के प्रसिद्ध दोहे 'को घटि हैं वृषभानुजा वे हलधर के बीर' में वृषभानुजा के स्थान पर श्री राधिका तथा हलधर के स्थान पर दाऊ शब्द रख देने से गाय और बैल के अन्वय सम्बन्ध बोधक अर्थ के निष्पन्न न होने के कारण कवि विवक्षित चमत्कार नष्ट हो जायगा। अतः यहाँ भी पदगत सौन्दर्य है अर्थगत नहीं। परिकर में साभिप्रायः विशेषण तथा परिकरांकुर में साभिप्राय विशेष्य का प्रयोग होता है, अतः उक्त दोनों अलङ्कारों में पदाश्रित सौन्दर्य रहता है।

भामह ने वक्रता समन्वित शब्दार्थ को काव्य कहा है—

वक्राभिधेय शब्दोक्तिः इष्टावाचामलंकृतिः।

वक्रता का तात्पर्य है लोकातिक्रान्त गोचर वचन। लाक्षणिक शब्द योजना की मूल चेतना इसी कोश वृद्ध अर्थ बोध में निहित रहती है। पाश्चात्य समीक्षकों ने उपयुक्तता के ब्याज से इस सौन्दु

विधान पर विचार किया है । परिकरांकुर, परिकर तथा श्लेष में मूल उचित स्थान पर उचित शब्द का प्रयोग सिद्धान्त विद्यमान है । एफ० एल० लूकास ने शैली का विवेचन करते हुये स्विफ्ट के मतोद्धरण के प्रसंग में इसका प्रतिपादन किया है । जब हम वन के समय सीता के धैर्य धारण की प्रशंसा के लिये उनके पर्याय रूप में धरणिसुता का प्रयोग करते हैं तब उपयुक्त शब्दयोजना की सार्थकता सिद्ध हो जाती है । शब्दों के प्रकरण सापेक्ष प्रयोग की गहराई तथा अतिरिक्त अर्थवत्ता काव्य-भाषा को अलग कर देती है—

धरणिसुता धीरज धर्यो असमय समय विचार ।

यह चमत्कार सृजन कवि चेतना का अनिवार्य गुण है । शब्दार्थ की संदर्भोचित गुण व्यञ्जकता काव्य-बन्ध का आधार है जो बिम्बों द्वारा सुनिश्चित भाव को उद्‌बुद्ध करती है । पात्र, भाव, स्थिति और अवसर के अनुकूल उक्ति का अर्थ सौन्दर्य पाठक की चेतना पर छा जाता है और काव्यात्मक तीव्रता के क्षणों में स्वर, लय आदि का संयोजन व्याकरणिक अपेक्षाओं के अभाव में भी पाठक और श्रोता को अभिभूत कर लेता है । वाक्यगठन के तत्त्वों वचन, पुरुष, लिंग, कारक तथा काल की अन्विति और क्रम भंग होने पर भी गहरे अर्थबोध में अन्तर नहीं आता । काव्य की तीव्रता और बढ़ जाती है । उदाहरण के लिये उत्तररामचरित का यह श्लोकार्ध लें ।

न किल भवतां देव्याः स्थानं गृहेऽभिमतं ततः
तृणमिव वने शून्ये त्यक्ता न चाप्यनु शोचिता ।

यहाँ राम का उपालंभ है नगर और देश में रहने वाले महात्माओं के प्रति, सीता का घर में रहना आप लोगों को सहन न हुआ । इसीलिये उस उपेक्षिता को तृण की तरह असार समझकर वन में छोड़ दिया और शोक भी नहीं किया । यहाँ अनुशोचिता और त्यक्ता के कर्त्तावाचक पद छोड़ दिये गये हैं । राम और नागरिक दोनों की समान धर्मिता क्रूरता की अभिव्यक्ति के लिये ही कर्त्ता का त्याग हुआ है । इस विचलन से कवि निरपराध के साथ हुये अन्याय तथा अंधे जनमत की भर्त्सना करना चाहता था । अतः विशेषोक्ति के माध्यम से कवि ने कर्त्ता का विपथन कराया । भावावेश में वाक्यगत तत्त्वों का शैथिल्य होना स्वाभाविक भी है । उत्तररामचरित में ही अन्यत्र तमसा तथा वासन्ती जब एक साथ सीता-राम को सम्बोधित करते हुये कहती हैं—

त्वयि वितरतु भद्रं भूयसे मंगलाय ।

तब वियोग में पृथक्-पृथक् रह रहे दो हृदयों और शरीरों के पुनः एक स्थान पर मिल जाने की भावी संभावना की व्यञ्जना करना चाहती हैं । यहाँ त्वयि का एकवचन में प्रयोग यह लक्षित करता है कि पति पत्नी एक व्यक्तित्त्व के ही दो रूप हैं, उन्हें पृथक्-पृथक् नहीं किया जा सकता । विशेष परिस्थिति में वे अलग हो गये हैं, कवि उनका एकत्व पुनः चाहता है क्योंकि दोनों का अनुराग अविच्छेद्य है । नाटक के सम्पूर्ण सुखान्त होने की संभावना को तीव्र करने के लिये ही कवि ने यहाँ दोनों के लिये त्वयि शब्द का एकवचन में प्रयोग किया है । शब्दगुण की काव्य-शास्त्रीय धारणा के मूल में यही भावना सन्निहित है । भावात्मक तीव्रता में वर्ण, पद, वाक्य का विचलन बड़ा महत्त्व रखता है । काव्य-प्रयोगों में इसके अनेक रूप मिल जाते हैं । डॉ० नगेन्द्र ने कहा है कि भाषा का कलाकार व्याकरण सम्मत क्रम से विपथन कर यानी उसमें व्यवधान उत्पन्न कर चमत्कार की सृष्टि करता है । इस विपथन या प्रसिद्ध व्यतिरेकी प्रयोग के अनेक प्रकार हो सकते हैं जिनकी गणना करना या संख्या में बांधना संभव नहीं है । भारतीय काव्य-शास्त्र में कर्त्ता क्रिया के सम्बन्ध परिवर्तन, कारक रूपों तथा विशेषण-विशेष्य आदि के प्रयोग व्यतिक्रम के भाषिक चमत्कार का विश्लेषण उपग्रह वक्रता के अन्तर्गत (जहाँ परस्मैपद और आत्मनेपद—कर्तृवाच्य और कर्मवाच्य का विपर्यय हो जाता है) कारक वक्रता (जहाँ कारक रूपों में फेर बदल हो जाता है)

तथा विशेषण वक्रता के अन्तर्गत् (जहाँ विशेषण-विशेष्य का सम्बन्ध अथवा प्रयोग क्रम बदल जाता है) हुआ है। दीपक अलङ्कार के आवृत्ति दीपक भेद में आवृत्ति का चमत्कार है, उपमा के रसनोपमा, मालोपमा आदि भेदों का सौन्दर्य समानान्तर प्रयोगों पर आधृत है। विरोधमूलक अलङ्कारों में शब्दार्थ के विषम प्रयोगों के तनाव द्वारा आकर्षण की सृष्टि की जाती है। इसके अतिरिक्त शृंखला मूलक अलङ्कारों में भाषिक चमत्कार सम-विषम प्रयोगों के विविध क्रम बन्धों पर आश्रित रहता है।[1] कुन्तक ने तो सम्पूर्ण अलङ्कार विधान को वर्ण, पद् तथा वाक्य वक्रता का प्रपंच मात्र माना है। बौद्धिक और भावात्मक मनोग्रन्थियों के अभिव्यञ्जन में सामान्य भाषिक संरचना से अतिरिक्त सरचना की अपेक्षा की जाती है जहाँ वर्ण, शब्द, वाक्य से भावों की तीव्रता के प्रति संगति उत्पन्न होती है। बालरामायण से कुन्तक ने एक वाक्य उद्धृत किया है—

मैथिली तस्य दारा: ।

यहाँ भावावेग के कारण व्याकरणिक क्रम में शैथिल्य आया है। मैथिली एकवचन और दारा: बहुवचन का प्रयोग है, मैथिली पद स्त्री लिंग में है और दारा: पद पुल्लिग में प्रयुक्त हुआ है। उक्ति वैचित्र्य पैदा करने के लिये ही यहाँ भाषिक गठन लचीला बनाया गया है। इसप्रकार अलंकृत चेतना के कारण ही काव्य-भाषा में विचलन की व्यापकता है। काव्य-भाषा कलात्मक प्रयोजन की संवाहिका है। अत: आधुनिक विचारक उसे व्याकरणशास्त्र अथवा भाषाविज्ञान से सम्बद्ध न मानकर स्वतन्त्र शास्त्र का विषय मानते हैं। डॉ० विद्यानिवास मिश्र डॉ० सियाराम तिवारी तथा राबर्टमिलर जैसे विद्वानों ने काव्य-भाषाविज्ञान को स्वतन्त्र विज्ञान के रूप में प्रतिष्ठित करने की सलाह दी है। अलंकृत चेतना सार्वकालिक और सार्वदेशिक है। केवल वैचित्र्य के स्वरूप में अन्तर रहता है। अतः अलंकृत चेतना और काव्य-भाषा के मूल में भी सार्वभौम एकता देखी जा सकती है तभी लय, बलाघात तथा पद प्रयोगों की भिन्नता के रहते हुए भी काव्य-भाषा की अतिरिक्त गुणवत्ता अथवा अन्यथाकृत प्रभाव सर्वत्र विद्यमान रहते हैं।

सन्दर्भ-संकेत

१. शैली विज्ञान—पृ० ७१ ।

प्राध्यापक, हिन्दी विभाग
गुरुकुल काङ्गड़ी विश्वविद्यालय
हरिद्वार

□ डॉ॰ सत्यप्रकाश शर्मा

किन्नामाश्लीलत्वम्

शिष्टजनानुमोदिते व्यवहारे सर्वत्रैवाश्लीलतायाः निषेधो दृश्यते । तद्यथा—याज्ञवल्क्यः ब्रह्मचारिणं मधुमांसादिसहैवाश्लीलभाषणादपि निवारयति[1], मनुः शिष्टान् अश्लीलयज्ञे गमनान्निषेधयति[2], अग्निपुराणञ्चाश्लीलत्वं वर्ज्यमुद्घोषयति ।[3] विष्णुधर्मोत्तरपुराणे तु न केवलमश्लीलदर्शनस्या[4]श्लीलोच्चारणस्यै[5]वाऽऽपितु अश्लीलबन्धस्यापि[6] निषेधो विहितः । विष्णुपुराणमपि अश्लीलवाक्यान्वितं काव्यं न कर्तुमुपदिशति ।[7] दैनिक व्यवहारेऽप्यश्लीलभाषणमपराधकोटौ समायातीति पद्मपुराणम् ।[8] रहसि परिहासेऽपि वाक्षन्तव्यमेवाश्लीलभाषणमिति मार्कण्डेयमतम् ।[9] पाञ्चरात्रागमेऽप्यश्लीलभाषणमपराधत्वेन स्वीकृतम् वर्तते ।[10] कृतेऽश्लीलभाषणे प्रायश्चित्तत्वेन प्रद्युम्नस्मरणायादिशाति जयाख्यसंहिता ।[11] अश्लीलाक्षेपेतु पञ्चविंशतिपणैर्दण्डय इतियाज्ञवल्क्यः ।[12] विष्णुस्मृतिः कार्षापणशतं दण्डत्वेन विनिश्चिनोति ।[13] नारदोऽप्यश्लीलाक्षेपं दण्डार्हमुद्घोषयति ।[14]

तत्र किन्नामाश्लीलत्वं यस्यैताद्दश्यवमानना सर्वत्रैव प्रतिपादिताऽऽस्ति ? प्रथमं तावदस्य शब्दस्य व्युत्पत्तिलभ्येऽर्थे दृष्टिर्निक्षिप्यताम् । "अनर्शरातिम्" ।[15] इत्यदादिऋङ्मन्त्रव्याख्यानावसरे "अनर्शरातिमनश्लीलदानमश्लीलं पापकम् अश्रिमद् विषमम्" इत्युक्तवान्महर्षियास्कः ।[16] तत्र भाष्यकृता दुर्गाचार्येण "अश्लीलं पापकम् इति ।············शब्दसारूप्यप्रसक्तमाह—अश्लीलम् = अश्रिमद्विषमम्. तत्सारूप्योपपत्तितोऽश्लीलमित्युच्यते" इति स्पष्टीकृतम् । एव नैरुक्ताः अश्रिमत् इत्यस्माद् अश्लीलेति शब्दं स्वीकुर्वन्ति ।

वैयाकरणास्तु शब्दमिमन्यथैव साधयन्ति । "कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा परिवडवातैतिलकद्रुः पण्यकम्बलो दासीभाराणां चे"[17] तिपाणिनीये सूत्रे पतितेऽश्लीलशब्दे कारीकाकारौ "अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम् । सिध्मादेराकृतिगणत्वाल्लच् । कपिलकादित्वाच्च । लत्वम् । अश्लीलदृढरूपेति हि संस्थानमात्रेण शोभना निःश्रीका लावण्यविरहितोच्यते[18] इत्युक्तवन्तौ । एवं तेषां मतेन श्रीशब्दात्" सिध्मादिभ्यश्च' [19] इतिसूत्रेण लच्प्रत्यये कृते श्रीलः, पृषोदरानि यथोपदिष्टम्'[20] इत्यनेन च रेफस्य स्थाने लत्वे कृते 'श्लील' इति सिद्धयति, नञ्समासे च नश्लीलमित्यश्लीलं 'निःश्रीकम्' इत्यर्थो भवति ।

वेदभाष्यकाराः सायणाचार्यास्तु न श्रीरश्रीः । तदस्यास्तीत्यश्री रः, मत्वर्थीयो रः"[21] इत्युक्त्वा 'श्री + रः' = श्रीरः, न श्रीरः = अश्रीरः (= अश्लीलः) इति साधयन्ति । श्रियं राति ददाति श्रीरः, न श्रीर इत्युश्लील इत्यपि व्युत्पत्तिर्विद्वद्भिः परिकल्पिताऽऽस्ति । वाचस्पत्यमित्यभिधाने "श्रियं लाति गृह्णाति, श्री + ला, आतोऽनुपसर्गे कः, कपिलकादित्वाल्लत्वम्, श्लीलम्, न श्लीलमश्लीलमिति"[22] निगदितम् ।

इत्थं सुस्पष्टं यद् वैयाकरणैर्नैरुक्तश्चापि शब्दस्यास्य व्युत्पत्तिः श्रीशब्दात् रप्रत्यये लप्रत्यये वा कृते नञसमासे विनिश्चिता । उपरिनिर्दिष्टासु व्युत्पत्तिषु रप्रत्ययान्ता व्युत्पत्तिः प्राचीनतमा प्रतीयते यतो ह्यश्लीलशब्दस्य प्राचीनतमं रूपम् 'अश्रीर' इत्येव प्राप्तम्भवति । ऋग्वेदस्याधस्तनेषु मन्त्रेष्वयं शब्दो विशेषणत्वाल्लिङ्गबन्धनं परित्यज्य विभिन्नेष्वर्थेषु प्रयुक्तः सन् दृक्पथे समायाति—

(क) यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वोवय उच्चते समासु ॥[23]

(ख) माष्वाद्य दुर्हणावान्त्सायं करदोर अस्मत् । अश्रीर इव जामाता ।[24]

(ग) अश्रीरा तनूर्भवति रुशती पापममुया ।
पतिर्यद्वध्वो३वाससा स्वमङ्गमभिधित्सते ।।[३५]

अत्र प्रथमे मन्त्रे "अश्रीरममङ्गलम्"[३६] द्वितीये मन्त्रे "अश्रीरः गुणैर्विहीनः कुत्सिता"[३७] तृतीये च मन्त्रे "अपवि[३८]त्रा" इत्यर्थेऽस्य प्रयोगो दृश्यते । "यूयं गावो मेदयथा[३९]" इत्याथर्वणे मन्त्रे 'अश्रीरम्' इत्यत्र अश्रीरं चित् अशोभनाङ्गमपि पुरुषम् "[४०] इत्युक्तवान् भाष्यकारः ।

एवमश्रीरशब्दस्यामङ्गलमपवित्रमशोभनं गुणैर्विहीनत्वात्कुत्सितञ्चेत्यर्थाः संहितासु दृश्यन्ते ते च सर्वेऽपि मानवस्वभावस्य शरीरस्य वा दोषधर्मत्वेन प्रयुक्ता वर्तन्ते ।

सर्वप्रथममथर्वणि[४१] ध्वनिपरिवर्तनं प्राप्यायमश्रीरशब्दोऽश्लीलेति रूपेण सम्प्राप्यते, यद्यपि मन्त्रोऽयं ऋग्वेदेऽपि[४२] वर्तते परे तत्र "अश्रीरा" इतिपाठः, अथर्वणः पैप्पलादसंहितायामपि[४३] अश्रीरा" इत्येव पाठोऽस्ति ।

उत्तरवर्तिनि वैदिकवाङ्मये तु 'अश्लील' इत्येव रूपमवाप्यते । ऐतरेयब्राह्मणं यावदस्यार्थे न किमपि परिवर्तनं लक्ष्यते । तत्राप्यनेन शब्देन शारीरदोषा एव सूचयन्ते स्म ।[३४] परं तैत्तिरीये ब्राह्मणे तु अश्लील-शब्दो ग्राम[५] नक्षत्र[३६]–जीवनया[३७]त्राणां विशेषणत्वेनानार्यम्शुभदुःखपूर्णेष्वर्थेषु प्रयुक्तो वर्तते । अश्लील-शब्दस्यार्थविस्तारस्येमानि प्रथमान्युदाहरणानि सन्ति । सामवेदीये पञ्चविंशब्राह्मणे वाचो विशेषणत्वेना-श्लीलशब्दस्य प्रथमः प्रयोगो दृश्यते तत्र अपवित्रा[३८], अमङ्गला[३९] गति सहिता[४०] चेति वाचो विशेषणार्था प्रतीयन्ते ।

श्रीतारानाथभट्टाचार्यस्तु सन्दर्भनिर्देशनमकृत्वैव ताण्ड्यब्राह्मणात् (पञ्चविंशेत्यपरनाम्नः) "यमश्रु त्याश्लीला वागृच्छतीति", यैवैनमत्तावश्लीलं वाग् वदति" इतिवाक्यद्वयं समुद्धृत्य तत्र क्रमेण "अश्लीला निन्दारूपा वाक्", "अश्लीलमश्रीकरम्" इति भाष्यवचनद्वयं समुद्धरति ।[४१] अनेनाश्लीलशब्दस्य निन्दा अश्रीकरञ्चेति द्वावर्थौ भवतः ।

अश्लीलेत्यर्थे संस्कृतेऽन्ये च केचन शब्दाः प्रयुक्ताः प्राप्यन्ते । ऋग्वे[४२]देऽत्र "अर्श" शब्दो दृश्यते तत्र च निरुक्तकृतः मतन्तु पूर्वमेव प्रदर्शितमस्माभिः । वाचस्पत्यमित्यभिधानेऽपि" अश्लीले पापिष्ठे" इत्युक्त्वाऽऽस्य निर्वचन ऋश्+अच् इति प्रदर्शितम् ।[४३] गौतमीये धर्मसूत्रे तु "शुक्लावाक्"[४४] इतिशब्दो वर्तते तत्र मिताक्षराकारः "शुक्ला अश्लीला"[४५] इति प्रतिपादयति । शुक्ल शब्दस्यायमर्थविपर्ययः कथं सञ्जात इत्यन्वेषणीयो विषयः । यथा हिन्द्यां 'सफेद झूठ' इति वाग्व्यवहारे' सफेद' शब्दः 'झूठ' इत्यस्य विशेषणत्वेन समाविष्ठस्तथैव 'शुक्लावाक' इत्यत्रापि भवेदथवा "देवानां प्रियः" इतिवत् किमप्यैतिहासिकं कारणमपि सम्भावितम् । विष्णुस्मृतौ[४६] "न्यङ्ग०" इति शब्दः कमपि गर्हितमर्थं व्यनक्ति । तत्र टीकाकारः केशवपण्डितः" न्यङ्गमश्लीलम्'[४७] इत्यवोचत् । परं मिताक्षराकारो विज्ञानेश्वरस्तु " न्यङ्गमित्यसभ्यम्, अवद्यं भगिन्यादिगमनं तद्युक्तमश्लीलमि"[४८] तिस्फोरयति । अन्यत्र तु सः 'न्यङ्गमवद्यम्' इत्येव कथयति ।[४९] अपरार्कः "न्यङ्गमसभ्यम्[५०] इत्यवोचत् । परं कात्यायनस्तु "न्यङ्गावगूरणं वाचा क्रोधात्तु कुरुते यदा । वृत्तदेशकुलानां तु अश्लीला सा बुधैः स्मृता ।।" इति स्मरति ।[५१]

श्रेण्यसंस्कृतसाहित्येऽयमश्लीलशब्दः अश्लीलपदप्रबन्ध[५२] अश्लीलप्रायगीयमानगीतानि[५३]-अश्लील-रासकपद[५४]—अश्लीलाख्यान[५५]—अश्लीलाचरण[५६]-अश्लीलसल्लाप[५७]- अश्लीलभावना[५८]प्रभृतिसन्दर्भेषु बहुधा प्रयुक्तः सँल्लक्ष्यते । तत्राश्लीलशब्दस्य कोऽर्थः ग्राह्यः ? अमरकोषे तु 'ग्राम्यमश्लीलम्'[५९] इति निगदितम् । अश्लीलमप्रियम्[६०], अश्लीलमश्लाघ्यम्,[६१], अश्लील पापकरम्[६२], अश्लीकं अश्रीकं श्रीघ्नम्[६३], अश्रीकम् अमङ्गलम्[६४], अश्लीकमयुक्तम्[६५] इति वदन्ति विद्वान्सः । अनेन विवेचनेन सुस्पष्टं भवति यद् ये शब्दाः

श्रोतृभ्योऽप्रियाः प्रतीयन्ते, शिष्टैरश्लाघ्या अयुक्ता वा मन्यन्ते, धार्मिकैः पापकराः श्रीघ्ना अमङ्गलोत्पादका-
श्चेति स्त्रीक्रियन्ते तेऽश्लीलपदवाच्याः भवन्ति ।

काव्यशास्त्रे त्वश्लीलत्वं काव्यदोषत्वेन वर्णितमस्ति । तत्र का परिभाषाऽऽश्लीलदोषस्य ? काव्येऽयं
दोषो नित्योऽनित्यो वा ? अनित्यश्चेत्कुत्राऽऽस्य गुणत्वम् ! इत्यनेके प्रश्नाः मस्तिष्कपटले सकृदेवायान्ति ।
वामनाचार्यः असभ्यमर्थं[६६] वाग्भटश्च व्रीडाव्यञ्जक[६७]मश्लीलत्वमिति स्वीकुरुतः । तत्र कोऽसभ्यः कश्च
व्रीडाव्यञ्जकः ? इति न सम्यग्व्यख्यातः । केशवमिश्र औज्ज्वल्याभाव एवाश्लीलत्वमित्युद्घोषयति[६८] परं
तेनापि औज्ज्वल्यस्य व्याख्या न समुपस्थापिता । अन्यत्र त्वौज्ज्वल्यनाम काव्यगुणैकभेदस्य वर्णितम् ।
भोजो[६९] वैद्यनाथश्चोभा[७०]वपि अश्लीलशब्देनैवाश्लीलं व्याख्यातवन्तौ । हेमचन्द्रेणाश्लीलशब्दस्य न कापि
व्याख्या कृता । मम्मटोऽप्यस्मिन्विषये मौनमेवावलम्बते, यद्यपि तेनोदाहरणैरिमं विषयं स्पष्टायितुं
प्रयासोऽपि विहितः । स व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वादश्लीलत्वस्य त्रैविध्यं स्वीकरोति । [७१] पुनः वाक्य-
पदपदांशसन्ध्यर्थगतत्वात्तस्य पञ्चविधत्वं प्रतिपाद्य वाक्यपदपदांशगतानां त्रीणि त्रीणि, अर्थगतस्य विसन्धि-
गतस्य चैकमेकमित्येकादशपद्यान्युदाहरणत्वेन तेन प्रस्तुतानि । तत्र पदगतस्याश्लीलस्योदाहरणत्वेनोदाहृतेषु
पद्येषु साधन-वायु-विनाशशब्दा व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वेन लेन प्रदर्शिताः सान्ति ।[७२] एवमेव वाक्य-
गताश्लीलस्योदाहरणेषु उपसर्पण-प्रहरण--मोहनशब्दा प्रीडदायित्याद्[७३], वान्तोत्सर्गप्रवर्तनशब्दाः
जुगुप्सोत्पादकत्वात्[७४], पितृवसति शब्दश्च श्मशानादिप्रतीतावमङ्गलार्थकत्वाश्लीलव्यञ्जक[७५] इति मम्मट-
मतम् । सः पदांशगताश्लीलस्योदाहरणरूपेण पेलव-पूयते ऽभीप्रेत शब्दान्[७६] विसन्धिगतस्य चोदाहरणत्वेन
"चलण्डारुचिङ्कुरु[७७]" इति शब्दद्वयमुदाहरति । अर्थाश्लीलस्योदाहरणन्तु—

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथास्य जायते पातो न तथा पुनरुन्नतिः ॥

अत्र हनम्=निर्घातादि, स्तब्धस्य=अदृढलिङ्गस्य, विवरम्=योनिच्छिद्रं तद्गामिनः । पातो रत्युत्तरं
नम्रता, उन्नतिः=पुनरुद्गमः । अत्रादृढलिङ्गरूपद्वितीयार्थस्त्वर्थवशादेनावगम्यते ।

अश्लीलविवेचनप्रसङ्गे विश्वनाथस्तु प्रायेण मम्मटमेवानुसरति । तत्प्रदत्तान्युदाहरणान्यपि साधन–
वायु–विनाश–वान्त–पेलव–लण्डा–चिङ्कु प्रभृतिशब्दमयान्येव सन्ति ।

एषु सर्वेष्वप्युदाहरणेषु सूक्ष्मेक्षिकया वीक्षितेषु ज्ञायते यदश्लीलत्वावाप्तिर्व्यञ्जन यैव सम्भवति,
स्वयं काव्यप्रकाशकारोऽपि "व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वाद्" इति स्वीकरोति । केवलं सन्धिगतमश्लीलं
तु श्रवणमात्रेणैव श्रोतुरन्तः करणे कामप्यश्लीलप्रतीतिं समुत्पादयति, यथा 'चलण्डामर' इत्यत्र 'लण्डा'
शब्दः । वरं संस्कृतकाव्यशास्त्रिणां मतमिदं न समीचीनं प्रतिभाति । मन्मते त्वत्रापि संस्कृतज्ञैर्न स्वीकरणी-
यमश्लीलत्वम् । यतो हि 'लण्डा' शब्दः केवलं लाटभाषायामपभ्रंशभाषायामेव वा शिश्नार्थवाचकः, न तु
संस्कृते । अतः लण्डाशब्देनाश्लीलत्वप्रतीतिर्लाट भाषाविद्भ्य एव भवेन्न केवलं संस्कृतज्ञेभ्यः । चेत्संस्कृतज्ञा-
स्तत्राकृष्टा भवेयुस्तदापि ते तत्राप्रयुक्तत्वदोषमेव स्वीकरिष्यति तस्यैकदेशप्रयुक्तत्वात् । अथ च, लण्डाप्रभृति-
शब्दानाधारीकृत्याश्लीलत्वं स्वीक्रियते चेद् तर्हि आम्रापरपर्यायश्चूतशब्दोऽप्यश्लीलव्यञ्जकत्वेन स्वीकृतं
भवेत् ? परं कविकुलगुरुकालिदासादिभिर्बहुशः प्रयुक्तेऽस्मिश्चूतशब्दे न केनापि काव्यशास्त्राचार्येणाश्लील-
त्वस्योद्भावना कृता । एवमेव चुद् धातोः योनिच्छेदनार्थे प्रयोगः क्षेमेन्द्रयुगेऽपि अगौडात्कश्मीरं यावत्प्रच-
लितोऽभवत् ।[७८] परं क्षेमेन्द्रोत्तरवर्तिभिर्मम्मटविश्वनाथविद्याधर-प्रभृतिभिः काव्यशास्त्रिभिः चूत, चोदय,
चोदना प्रभृति शब्देषु न व्रीडाव्यञ्जकताऽऽङ्गीकृता न च तत्कारणादश्लीलत्वमेव स्वीकृतम् । औचित्य-

सिद्धान्तस्य प्रबलपोषकेन स्वयं क्षेमेन्द्रेणापि कानिचिदेताद्दशीनि पद्यानि विनिर्मितानि यानि श्रुत्वैव श्रोतुरन्तः करणे व्रीडा जुगुप्सा च जायेते । पश्यन्तु तावदधोऽङ्कितानि पद्यानि—

गौरः सुपीवरो धत्ते रण्डाया मुण्डितो भगः ।
मेरोरर्कहयोल्लीढशष्पहेमतटभ्रमम् ।। नर्ममाला ३/३३
परस्परप्रार्थनया सुमुण्डित भगध्वजौ ।
भूकम्पकारिणौ रात्रौ तौ रण्डाब्रह्मचारिणौ ।। तत्रैव ३/३९
खल्वाटो विरलश्मश्रुर्दीर्घवाक् प्रस्खलन् क्वचित्
विभ्राणोवदनं वृद्धमहिषीभगविभ्रमम् ।। तत्रैव, २/१०६

यद्यपि क्षेमेन्द्रेण एषां पद्यानां रचना छात्ररण्डागुरुब्रह्मचारिणां दुश्चरित्रोद्घाटनाय, सुजनविनोदाय, सर्वलोकोपदेशाय च कृता[७९] वर्तते तथापि किं दुष्टानां दुश्चरित्रवर्णनायैताद्दशा एवाश्लीला असंयताश्च शब्दाः केनापि महाकविना प्रयोक्तव्याः ? उत्तमोद्देश्यप्राप्तुमपि अधमशब्दानां प्रयोगो न शिष्टजनानुमोदितः । महाभारतीयां कथामाकर्ण्य देवर्षिनारदेनाऽऽपि महर्षिव्यासम्प्रति एताद्दशी एव टिप्पणी विहिताऽऽसीत् ।

संस्कृतकाव्यसाहित्येऽश्लीलसाहित्यस्य न विरलता । गाथासप्तशती–अमरुशतकप्रभृतीनि मुक्तकानि, समग्रमपि च भाणसाहित्यमश्लीलमेव वर्तते । काव्यशास्त्रीयलक्षणग्रन्थेष्वपि 'सम्भोगश्रृगारोऽत्रे' त्युक्त्वा नैकान्यश्लीलपदानि समुद्धृतानि । अनेन ज्ञायते यत्तेषामश्लीलविवेचने दृष्टिरेकाङ्गिनी आसीत् । महाकवीनां ऋषीणाञ्च काव्ये दोषोद्भावनं तेभ्यः न रोचते स्म । इदमेव कारणं यत्तेऽलीलत्वमनित्यदोषं स्वीकृत्य विशिष्टेषु स्थलेषु गुणमध्येऽपि तं गौरवेग सस्थापयन्ति । यथाह काव्यप्रकाशकारः "अश्लीलं क्वचिद्गुणः, यथा सुरतारम्भगोष्ठयाम[८०]······शमकथासु ।[८१] एवमेव—

"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरूजघनस्पर्शी नीवीविस्रंसनः करः ।।"

सामान्यरूपेण सन्दर्भविरहितेऽस्मिञ्छ्लोकेऽश्लीलभावना बलवती वर्तते । परं प्रसङ्गेन संयोजिते सत्यत्र करुणश्रृंगारयोः समावेशेऽपि न रसदोषः, श्रृङ्गारस्य करुणरसपोषकपरत्वात् ।[८२] होलिकोत्सवेऽश्लीलभाषणं दोषाय न कल्प्यते, तत्र तु शास्त्रमप्यादिशति—"जुगुप्सितं च ब्रूयात्' [८३], तत्र न किमप्यशिष्टममङ्गलकरं पापकरं वा । कथम् ? कासु स्थितिषु शास्त्रेणाश्लील भाषणं विधितमा वर्णितमिति न ज्ञायते । जातकर्मविवाहकर्मणो स्त्रीभिरश्लीलप्रायगीतानि गीयन्ते[८४] यानि संस्कारस्य अनिवार्याणी लौकिककृत्यानि भवन्ति । कथासरित्सागरे 'अश्री' दुर्भाग्यदेवीरूपेण स्मृताऽऽस्ति । अतः प्रतीयते यदमङ्गलविनाशाय अस्या अपि प्रतिष्ठा जनसामान्ये तथैव जाता यथा पुरा विघ्नकरस्य गणेशस्य ।

यद्यपि शब्दा अनेकार्थाः भवन्ति, परं केचन शब्दाः कतिपयेषु विशिष्टष्वेवार्थेषु लोकप्रसिद्धाः जायन्ते यथा ब्रह्माण्ड-शिवलिङ्ग-हिरण्यरेतस्-अभिप्रेत-संस्थित-साधनचिकु-सुभगा-भगिनी-कुमारी-उपस्थान-वायु प्रभृतयः । एषां शब्दानां लोकप्रसिद्धोऽर्थोऽपि न वाच्यार्थः । चेदत्र वाच्यार्थ एव स्वीक्रियते तर्हि अश्लीलत्वं सभापतेत । अतः काव्यशास्त्रिभिरुद्घोषितामुक्तकण्ठैर्यत्सद्भावनया प्रयुक्तो रुढशब्दोऽपि नाश्लीलदोषयुक्तो भवति, यदाह भोजराजः सरस्वतीकण्ठाभरणे—

ग्राम्यं घृणावदश्लीला मङ्गलार्थं यदीप्सितम् ।
तत्सवीतेषु गुप्तेषु लक्षितेषु न दुष्यति ।।
संवीतस्य हि लोकेषु न दोषान्वेषणं क्षमम् ।
शिवलिङ्गस्य संस्थाने कस्याऽसभ्यत्वभावना ।।

काव्यशास्त्रजगति सिद्धान्तोऽयं संवीतसिद्धान्तेतिनाम्ना प्रथितोऽस्ति । काव्ये भवतु नाम लोकप्रसिद्धिः अश्लीलतायाः कारणमकारणं वा परं मानवान्तः करणे तु तदीया वासनात्मिका भावनैव श्लीलाश्लीला वा भवितुमर्हति । काव्यस्य लक्ष्यीभूतानां सहृदयानां सामाजिकानामन्तःकरणेषु विद्यमानाः जुगुप्सारतिनिर्वेद-हास्यादयः स्थायिभावा एव विभावानुभावादिभिः सम्पुष्टाः सन्तः रसत्वेनानुभूयन्ते । अतोऽस्माक मतमिदं सुसंस्थापितम्भवति यदश्लीलत्वोद्भावकाः जुगुप्साद यस्तु मामवान्तःकरणे तेषामश्लीलत्वेन प्रतीतिस्तु देशकालभावनासु निर्भरा भवति । अप्सरसां कामोद्दीपका विलासा अपि ऋषिभ्यः नालम्बभूवुः । आचार्यः यथा छात्रान् पाठयति तथैव बालिका अपि, परं तस्य हृदये बालिकाः प्रति न कापि वासनामयी भावना जायते । चिकित्सकः मूर्च्छितां निर्वस्त्रां युवतीमेकान्तेऽपि दृष्ट्वा स्वकर्तव्यं न विस्मरति । सभ्यतासंस्कृति-शून्येषु ग्रामीणेषु अश्लीलगालीनामुच्चारणसभ्यमयुक्तं पापकरं वा न मन्यते । मनुष्यो हि स्वभावेनैव सामा-जिकः प्राणी । सः सामाजिकैः स्वीकृतां व्यवहारपद्धतिमेवानुसरति—"यद्यदाचरति श्रेष्ठः लोकस्तदनु-वर्तते" इति नियमात् । शिष्टा अपि देशकालविशिष्टमान्यताबन्धनान्न विनिर्मुक्ता भवन्ति । अत एकस्मिन्ने-वाश्रये श्लीलमश्लीलमित्युभेऽपि भवितुमर्हतः रुचिर्वैमिन्यात् । न कोऽप्यश्लीलसम्यं वा व्यवहारं कर्तु-मिच्छति । एवमेव काव्येऽप्यश्लीलशब्दयोजनायां तन्नियत्वात् कवेः प्रवृत्तिर्न भवति । पण्डितराजोऽपि स्वी-करोति—'यत्राश्लीलं दोषस्तत्राप्यप्राकरणिकेऽर्थे सकलानुभवसिद्धे कवितात्पर्यस्यविरहात् ।" परं शमादि-कथाप्रसङ्गे तु कविः जुगुप्सामङ्गलव्यञ्जकाञ्छब्दान् महता प्रयत्नेन प्रयुनक्ति यतो हि ताञ्छ्रुत्वैव श्रोता तेभ्यः विमुखो जायतेऽत्रैव च कवेस्तात्पर्योऽपि विलसति । यदा कदा स्वभावोक्तिपूर्णवर्णनेष्वपि समायाति अश्लीलता—यथा—

आघ्राय सुरभेर्योनिमुन्मुखैर्दीर्घमेहनः ।
महोक्षैर्लम्बिमानाण्डैर्विष्वग्व्याकुलितं वनम् ॥

अश्लीलोदाहरणत्वेनोद्धृतोऽयं श्लोकः प्रतापरुद्रीये । अत्राश्लीलवर्णने न प्रतिभाति कवेरुद्योगः । गोसमूहमध्ये विचरतां वन्यवृषभाणामिदं वर्णनं स्वाभाविकमेव । अतोऽत्र स्वभावोक्ति-रेखालंकारः स्वीकार्यो भवेत् ।

वस्तुतः कवेरवचेतनमनसि विद्यमानाः भावा एव विशिष्टशब्दयोजनायां कारणत्वमुपयान्ति । एवमेव श्रोतुः पाठकस्य वावचेतने मनसि वर्तमानाः भावा विशिष्टानुभूतेः कारणानि भवन्ति । अतोजानताऽजानता-ऽपि वा कविना द्वयर्थकाः शब्दाः प्रयुज्यन्ते । सामाजिकोऽपि वासनावशाद् अन्यार्थलोके विचरन् कमप्यपूर्व-मानन्दमनुभवति । काव्ये हास्योत्पत्त्यै अश्लीलयोजना भरतेनापि स्वीकृता ।[५] परिहासार्थमपि कवयोऽश्लील-प्रायबन्धनिर्माणे तत्पराः दृश्यन्ते यथा—

विद्यामभ्यस्यतो रात्रावेति या भवतः प्रिया ।
वनिता गुह्यकेशानां कथं ते पेलबन्धनम् ॥

अनेन समग्रेण विवेचनेन ज्ञायते यदस्माकमाचार्यवर्य्यैरेकतस्तु अश्लीलं वर्ज्यं निन्द्यञ्चोद्घोषितम-परतश्च शास्त्रादिष्टमुद्घोष्य श्रृङ्गारादिरसपरिपोषकत्वेन तदीयां महत्तां स्वीकृत्य संवीतासिद्धान्तबलेन तस्य न केवलमनित्यत्वमपितु गुणत्वमपि सुप्रतिपादितम् ।

सन्दर्भ संकेत—

१. या० स्मृ० १।३३
२. मनु० स्मृ० ४।२०६ ।
४. अग्निपु० १५३।३; ३५६।६६ ।
४. विष्णुध० पु० २।८६।१५ ।

५. विष्णुध० पु० २।८६।५६।
६. तत्रैव, ३।१६।१५।
७. विष्णुपु० ३।१५।६।
८. पद्मपुराणम् ४।७६।४१।
९. मार्क० पु० ८।२३५–३६।
१०. पाञ्चरात्र० ४।११।१५।
११. जयाख्यसंहिता २५।१०६।
१२. या० स्मृ० २।२०५–६।
१३. विष्णु स्मृ० ५।३३।
१४. ना० स्मृ० १५।१–२।
१५. ऋ० ८।९९।४।
१६. निरुक्त ६।५।१।
१७. अष्टाध्यायी ६।२।४२।
१८. तत्रैव काशीका।
१९. अष्टा० ५।२।९७।
२०. तत्रैव, ६।३।१०९।
२१. ऋ० ८।२।२० सायणभाष्य।
२२. वाचस्पत्यम्, भाग १, पृ०।
२३. ऋ० ६।२८।६।
२४. तत्रैव ८।२।२०।
२५. तत्रैव १०।८५।३०।
२६. ऋ० ३।२८।६ सायणः।
२७. तत्रैव ८।२।२० सायणः।
२८. तत्रैव १०।८५।३० दयानन्दःसरस्वती
२९. अथर्व० ४।२१।६।
३०. तत्रैव सायणः।
३१. अथर्व० १४।१।२७।
३२. ऋ० १०।८५।३०।
३३. पैप्पलादसं० १८।३।६।
३४. ऐ० ब्रा० ४।८।१०८।
३५. तै० ब्र० १।५।२६।
३६. तत्रैव ५।३।२।
३७. तत्रैव २।४४।९।
३८. प० विं० ब्रा० १४।११।२७।
३९. तत्रैव १७।५।१।
४० तत्रैव २।१।७।
४१. वाचस्पत्यम्, प्रथमो भागः, पृ० ४९७ 'अश्लील'।
४२. ऋ० ८।९९।४।
४३. वाचस्पत्यम्, प्र० भा०, पृ० ४९६ 'अश्रीर'।
४४. शुक्लावाचो मद्यं नित्यं ब्राह्मणः—गौ० ध० सू० २।५५।
४५. तत्रैव मिताक्षरायाम्।
४६. न्यङ्गतायुक्ते क्षेपे कार्षोपणशतम्—वि० स्मृ० ५।३३।
४७. तत्रैव वैजयन्तीटीकाकारः केशवपण्डितः।
४८. या० स्मृतौ २।२०४ मिताक्षरा।
४९. या० स्मृ० २।२०५ मिताक्षरा।
५०. तत्रैव अपरार्कः
५१. या० स्मृ० २।२०४ अपरार्केणोद्धृतः। काव्यजगति असभ्यत्वमश्लीलत्वञ्चोभेऽपि स्वतन्त्ररूपेण स्वीकृते स्तः, लक्षणग्रन्थेषूभयोः स्वतन्त्रलक्षणोदाहरणैरिदं सुस्पष्टमेव।
५२. अवन्तिसुन्दरी १९३–२१।
५३. वासवदत्ता १३२–७।
५४. हर्षचरितम् १८८–६।
५५. कथासरि० ६।२।१७३।
५६. नैषधी० २०।१३९।
५७. राजतरंगिणी, ६।१५८।
५८. परमानन्दकाव्यम् ८०।१०।
५९. अमर० १।६।२९।
६०. या० स्मृ० १।३३ दीपकलिका।
६१. मनु० ४।२०६ मेधातिथिः।
६२. तत्रैव सर्वज्ञनारायणः।
६३ तत्रैव कुल्लूकभट्टः।
६४. तत्रैव नन्दनः।
६५. तत्रैव गोविन्दराजः।

६६. काव्यालंकारसूत्र २।१।१५।
६७. काव्यानु० २८।६।२।
६८. अलंकारशेखरः ४।१।१७।
६९. सरस्वती० ४४।१४।
७०. प्रतापरुद्रीये।
७१. त्रिधाऽश्लीलम् का० प्र० ७।२ तत्रैव च "त्रिधेति व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्। एषामुदाहरणानि तु तत्रैवावलोकनीयानि।
७२. एषामप्युदाहरणानि काव्यप्रकाश एव दृष्टव्यानि।
७३. भूपतेरुपसर्पन्ती कम्पना वामलोचना।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ।।
७४. तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते।
इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्तनम्।।
७५. पितृवसतिमहँ व्रजामि तां सह परिवारजनेन यत्र मे।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम्।।
७६. पेलवस्यैकदशस्य पेलशब्दस्य लाटभाषायां वृषणवाचत्वात् 'पूयते' इत्यत्र 'पूय' इति शब्दः रक्तश्लेष्मापदस्य, 'अभिप्रेत' इत्यत्र 'प्रेत' इति च मृतकस्य वाचकत्वाद् अश्लीलत्वम्।
७७. चलण्डा (च+लण्डा=लाटभाषायां शिश्नवाचकाः), रुचिङ्कुर (रु+चिङ्कु+रु, चिङ्कु=योनिवाचकाः शब्दाः)।
७८. स्नाने दाने व्रते श्राद्धे निष्कारणरुषा ज्वलन्।
मातरं चोदयामीति वदन् सर्वं करोति सः।। देशोपदेशः ६।४४
७९. देशोपदेश-नर्ममाला-समयमातृका कृतीनां पुष्पिका अवलोकनीयाः।
८०. काव्य प्रकाश, पृ० ३५० (आ० विश्वेश्वर), तृतीय संस्करणम्।
८१. ,, ,, पृ० ३५१।
८२. ,, ,, पृ० ३७३–४।
८३. पारस्करः।
८४. बाणभट्टेनापि हर्षचरिते संकेतितम्।
८५. नाट्यशास्त्र, २२।१०१।

———

७. प्रोफेसर्स कालोनी
बदायूँ

□ डा० रमेशचन्द्रः शुक्लः

कला तन्महनीयता च

अस्ति कला सुन्दरतायाः मूलतत्त्वम् । ईश्वरेणमानवाय तदीयेन जीवनेनैव सह शक्ति स्वरूपा कला समर्पितास्ति । परमपुरातनकालादेव मनुष्यस्य कलाप्रियत्वं पश्यतो जगतोलक्षणो वर्षाणि व्यतीतानि सन्ति । पाषाणानेहसिसः कन्दराणां भित्तिपु चित्राण्यालिखन् प्रेक्षितोऽभवत् । धातुयुगेऽसौ पावायुचशकटा-दीनि धातुना कुर्वन् प्राप्तो बभूव । धातुरचितनर्तकी वृष प्रभृतिवस्तूनि प्राक्तन्याः अभ्यतायाः कलानुरागित्वं व्यक्तीकुर्वन्ति ।

मानव जीवनेऽस्ति कलायाः असाधारणं महत्त्वम् । एकतः जीवनमुपकुरुते, एकतश्च सा जीवनं निर्मिमीते । सा मानवं संस्कुरुते, तं यशस्विनञ्च विदधाति । सा या शक्ति र्या अनेकताम् एकतया निबध्नाति । समाजस्य जीवने तदीया यां गत्याज्य तस्याः प्रभावः सर्वत्र व्याप्तो भवन् विभाति ।

कल् धातोः अचि टापि च प्रत्यये कृते सति 'कला' इत्येतत् पदं सिद्ध्यति । कल् धातुर्यद्यपि बहु वर्थकः परमिह प्रमोदनमित्येपीऽर्थो ग्राह्यः । केचन विद्वांसः कलातीत्येष विग्रहः कला शब्दस्य विदधति । 'क' इत्यस्य सन्त्यनेकार्थाः । तेष्वर्थेपु सुखम् इत्येषोऽप्यन्यतमोऽस्त्यर्थः । तेन कला शब्दस्यार्थो भवति 'सुखदेति' । क्षेमेन्द्रः शिवसूत्रविमर्शिन्यां कलाया व्युत्पत्तिमधिकृत्य शंसति ।

"कलयति स्वरूपम् आवेशयति वस्तुनिवा ।"

कवेर्लास्यस्य च प्रथमाक्षरसंयोगेन 'कला' शब्दो निष्पद्यते इति डॉ० रामदत्त भारद्वाजो मन्यते । भोजराजः कर्तृत्व शक्तेरभिव्यक्तिः कलेति निगदति । विश्वकविः रवीन्द्रनाथटैगोरः स्वानुभूतेरभिव्यक्ति-मेव कलां मन्यते । मैथिलीशरणगुप्तस्य मतेन 'अभिव्यक्तेः कुशलशक्तिरेव कला' । प्रतीच्यः प्रधीरश्किमः ।

ईश्वरीयां कृतिं प्रति मानवो यमाह्लादमभिव्यनक्ति सः 'कला' इति कथयति । "स्वकीये मानसे उदितानां भावनाना मनुभूतेः क्रिया-रेखा-वर्ण-ध्वनि-शब्दादिभिः परकीयहृदयपर्य्यन्तमाहरणाय कृतां प्रक्रियां" 'कला' इत्येतया संज्ञया ब्रूते टालस्टायः । प्लेटो 'सत्यस्यानुकृतेरनुकृतिः कलेति' वदति । क्रोचे-मतेन ब्राह्यप्रभावस्याभिव्यक्तिः कलास्ति । आधिभौतिकी सत्तां प्रकटीकतु साधनं कलास्तीति हीगेल आमनति । शुक्रनीत्यां ४।६५। शुक्र आचार्य आमनति—

"शक्तो मूकोऽपि यत् कतु कलासंज्ञं तु तत्स्मृतम् ।"

गणकारिकायाः रत्नटीकाकारोमासर्वज्ञश्चेतनाश्रितं निश्चेतनं तत्त्वं कलां मनुते । मुनिर्भरतश्च नाट्यशास्त्रे उल्लिखति कलाम्—

